Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकादशी महात्म्य (पूर्ण)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ श्रीगणेशायनमः सूतउवाच कदाचिदर्जुनःश्रीमानविष्णुभक्तिपरायणः भक्तिजिज्ञासयापृच्छद्वासुदेवंमहा
मा॰ मतिम् १ अर्जुनउवाच उपवासस्यनक्तस्यएकभुक्तस्यवैप्रभो। किंपुण्यंकिंफलंचैवब्रूहिसर्वंजनार्द्दन २
१ श्रीभगवानुवाच हेमन्तेचैवसंप्राप्तेमासिमार्गेचशोभने कृष्णपक्षेचपापार्थद्वादशीतामुपोषयेत् ३ दश
म्यांचैवनक्तंतुशुद्धचित्तोदृढव्रतः नक्तंवापितथाकृत्वादशम्यांनियतस्सदा ४ क्रियतेवासमर्थेननक्तमे
कादशीदिने नक्तंवापिविधिःप्रोक्तःफलहारंतथैवच ५ दिवसस्याष्टमेभागेमन्दीभूतेदिवाकरे नक्तंतच्चवि
जानीयान्ननक्तंनिशिभोजनम् ६ नक्षत्रदर्शनान्नक्तंगृहस्थेनविधीयते यतेर्दिनाष्टमेभागेरात्रौतस्यनि
षेधनम् ७ ततःप्रभातसमयेकृत्वासम्यग्व्रतस्यच मध्याह्नसमयेपार्थकृत्वासम्यग्विधिंतथा ८ व्रत
स्यांगत्वमाश्रित्यपश्चात्स्नानंसमाचरेत् अधमंकूपकेस्नानंवाप्यांचैवचमध्यमम् ९ तडागेउत्तमंस्नानंन
द्यांस्नानंततोधिकं पीड्यंतेजंतवोयत्रजलमध्येतुसंस्थिताः १० तस्मात्सर्वप्रयत्नेनगृहेस्नानंतुकारयेत्
क्रोधंलोभंपरित्यज्यमिथ्यावादंतथैवच ११ धर्मनिंदांचकुर्वंतितेषांसंगंतुवर्जयेत् वर्जयेत्तद्दिनेपार्थति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ए द्रंचैवतुमैथुनम् १२ धर्मवाक्यविनोदेनतद्दिनंसमयेत्सदा केशवंपूजयित्वातुसर्वाद्यंभक्तवत्सलम् १३
मा० गंधमाल्यंतथाधूपदीपंचैवनिवेदयेत् यथास्तुत्वातथानत्वाविभेदंनैवकारयेत् १४ रात्रौजागरणंकु
२ र्यात्कथांश्रुत्वाहरेरिमां विप्रायदक्षिणांदद्यात्प्रणिपत्यक्षमापयेत् १५ एवंयःकुरुतेपार्थशृणुतस्यै
वतत्फलं यथासंपूजितागौरीकल्याणीगौर्वेदविद्वरैः १६ संतारयतिदातारंद्वादशपापौघांतथा वारा
णस्यांतथापार्थवासोवर्षसहस्रकैः १७ एकादश्युपवासस्यकलांनार्हतिषोडशीम् संक्रांतौनांचतुला
क्षंयोदद्यातिधनंजय १८ प्रभासक्षेत्रेयत्पुण्यंग्रहणेचंद्रसूर्ययोः एकादश्युपवासस्यकलांनार्हतिषो
डशीम् १९ केदारस्योदकंपीत्वापुनःजन्मनविद्यते तथाचैकादशीह्येषागर्भवासक्षयंकरी २० यति
लक्षंगृहेयस्यभुंजीतचैवदिनेदिने तत्फलंजायतेनूनंएकादश्युपवासिनः २१ तपस्विनोगृहेनित्यंभुंजतेच
द्विजोत्तमाः षष्टिवर्षसहस्राणितस्यपुण्यंचयद्भवेत् २२ एकादश्युपवासस्यकलांनार्हतिषोडशीम् व्रते
नास्यासमंपुण्यंनभूतंनभविष्यति २३ गोसहस्रस्ययत्पुण्यंदत्वावेदांगपारगे एतच्छतगुणंपुण्यमेकादश्यु

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ पवासिनः २४ नित्यंहिभोजयेद्यस्तुदशचैवद्विजोत्तमान् भवेद्दशगुणंपुण्यमेकादश्युपवासिनः २५
मा॰ ब्रह्मचारिसहस्रस्यवानप्रस्थस्तथाधिकः भवेद्दशगुणंपुण्यंयतिनैकेनपांडव २६ यतेर्दशगुणंपुण्यंभू
३ मिदानेनतद्भवेत् भूमेर्दशगुणाकन्यासर्वाभरणभूषिता २७ कन्यातोप्यधिकाविद्यापृथिव्याश्चधनं
जयः विद्यातोप्यधिकंचान्नंयोदद्यातिबुभुक्षिते २८ अन्नाद्दशगुणंतोयंयोदद्यातितृषातुरे तोयदा
नसमंदानंनभूतन्नभविष्यति २९ मेषकर्कटयोर्मध्येप्रपांयःकुरुतेसुधीः तृप्तिमायान्तिकौंतेयस्वर्गस्था
पितृदेवताः ३० अन्नदानसमंपुण्यंगोमेधस्यापिपांडव गोमेधस्यापियज्ञस्यअश्वमेधशताधिकम् ३१
अश्वमेधस्ययज्ञस्यनरमेधःसहस्रकं नरमेधसहस्रस्यतपस्वीभोजनंस्मृतम् ३२ तपस्विभ्योधिकंयोगीसंक्रां
तौदानमुत्तमं संक्रमात्सहस्रगुणंग्रहदानंचपांडव ३३ ग्रहाच्छतगुणंपुण्यंव्यतीपातेधनंजय व्यतीपाता
तशहस्रस्यविधृतौपांडुनंदन ३४ तत्फलंजायतेनूनमेकादश्युपवासिनः केदारस्योदकंपीत्वाकुंडायेय
स्तुसंस्थितः ३५ तस्यदेहेत्रयोदेवाब्रह्माविष्णुमहेश्वराः भवंतितेनतुल्याश्चएकादश्युपवासिनः ३६ तेन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ रा: पुन्यकर्माणः येभक्त्या उक्तिमणीपते: एकादश्याव्रतस्यापिपुण्यसंख्यानविद्यते ३७ एतत्पुण्यंभवेत्तस्य
मा॰ त्सुरैरपिदुर्लभं एतस्मात्चार्द्धपुण्यंचनिश्चयंनक्तभोजने ३८ नक्तस्यार्द्धंभवेत्पुण्यंएकभुक्तस्यकारिणः
४ एकभुक्तंचनक्तंचअपवित्रमुपोषणं ३९ तावद्गर्जंतितीर्थानिदानानिनियमास्तथा यावन्नोपवसेज्जंतुर्वासरं
विष्णुवल्लभं ४० तस्मात्वंपांडवश्रेष्ठव्रतमेतत्समाचर एकभुक्तस्यनक्तस्यउपवासस्यवैवहि ४१ पुण्यसं
ख्यानजानामियत्वंपृच्छसिपाण्डव एतद्वैकथितंपार्थयज्ञोप्ययंव्रतमुत्तमम् ४२ एकादश्यासमंनास्तिक्र
त्वायज्ञसहस्रकं अर्जुनउवाच उत्पन्नासाकथंदेवपुण्यामद्वादशीकथं ४३ कथंपवित्राचैवेषाकथं
वैदेवताप्रिया श्रीभगवानुवाच पुराकृतयुगेपार्थमुरनामेतिदानवः ४४ अत्यद्भुतोमहारौद्रोदेवानांच
भयंकरः इंद्रउच्छेदितस्तेनअन्योदेवःपुरंदरः ४५ आदित्यश्चशिवोब्रह्मावायुरग्निस्तथैवच नवंप्रति
ष्ठितंतेनएवमादिधनंजय ४६ देवतानिर्जितास्तेनअत्युग्रेणमहात्मना स्वर्गान्निवारितादेवाविचरन्तिम
हीतले ४७ मर्त्येषुसंस्थितादेवाःनशोभंतेजनाइव तदाजगामसुरराट्शिवमाहविनम्रधीः इंद्रउवाच

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ उपायंब्रूहिमेदेवश्रमणायानिकांगतिम् ईश्वरउवाच देवराजसुरश्रेष्ठपत्रास्तेगरुडध्वजः शरण्यःस
मा॰ जगन्नाथःपरित्राणपरायणः ४९ गच्छध्वंवैसुरश्रेष्ठायत्रनारायणोहरिः इन्द्रउवाच ईश्वरस्यवचःश्रु
५ त्वागतोदेवस्त्वत्सकाशात् ५० त्रिदशैःसहितःसर्वैर्गतस्तत्रधनंजय अप्सरोगणगंधर्वैःसिद्धविद्याधरोर
गैः ५१ पश्येवसजगन्नाथःप्रसुप्तोस्तिजनार्दनः जलमध्येतुसुप्तंतंदृष्ट्वादेवंजनार्दनं कृतांजलिपुटोभू
त्वाइंद्रःस्तोत्रमुदीरयत् इंद्रउवाच ॐनमोदेवदेवेशदेवतानांचवंदित ५२ दैत्यारेपुंडरीकाक्षत्राहिमां
मधुसूदन सुराःसर्वेभयायुक्ताभयभीतास्समागताः ५३ नमस्तेस्थितिनाशायनमस्तेचजगत्पते नमस्तेदे
त्यनाशायत्राहिमांमधुसूदन ५४ शरणंतेजगन्नाथत्राहिमांभक्तवत्सल त्राहिमांदेवदेवेशत्राहिमांचज
नार्दन ५५ त्रिदशास्त्वागतास्सर्वेत्वमेवशरणंप्रभो शरणागतदातावसहायंकुरुतेप्रभो ५६ त्वंपतिस्त्वं
मतिर्देवत्वंकर्तात्वंचकारणं त्वंमातासर्वलोकानांत्वमेवजगतःपिता ५७ त्वंस्थितिश्चत्वमुत्पत्तिस्त्वंचसंह
रकारकः त्वंस्वाहात्वंस्वधादेवत्वंचस्वस्तिकारप्रभो ५८ धातात्वंचत्वमाकाशःसर्वविश्वस्यकारणं जीव॰

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ त्वंचत्वंयंब्रह्माभुवनस्यचपालकः ५९ त्वंरविस्त्वंशशिर्वायुस्त्वंचदेवोहुताशनः वरुणस्त्वंजगन्नाथवि
मा॰ धातात्वंचैवप्रभो ६० नत्वयारहितंकिंचित्त्रैलोक्येसचराचरे भगवन्देवदेवेशशरणागतवत्सल ६१ नविद्धं
६ तिवचोदेवभयभीताश्चदेवताः दानवैर्निर्जितास्सर्वेस्वर्गभ्रष्टाःकृताःप्रभो ६२ स्वर्गंत्यक्त्वाजगन्नाथविविरे
ष्विमहीतले इंद्रस्यवचनंश्रुत्वाविष्णुर्वचनमब्रवीत् ६३ श्रीभगवानुवाच कीदृशोदानवःशक्रकिंनामकी
दृशंवलम् किंस्थानंतस्यदुष्टस्यकिंवीर्यंकिंपराक्रमं ६४ किंचशक्रातअत्युग्रोममाख्याहिपुरंदर इंद्रउवा
च भगवन्देवदेवेशब्रह्मवंशसमुद्भवः ६५ तारजंघस्तुनाम्नासअत्युग्रोहिमहासुरः तस्यपुत्रोतिविख्या
तोसुरनामेतिदानवः ६६ रक्तनेत्रोदीर्घवाहुश्चबलेनातिदर्पितः अत्युत्कटोमहावीर्योब्रह्मवंशसमुद्भवः
६७ पुरींचंद्रावतींनामतत्रस्थानेवसत्यसौ निर्जितादेवतास्तेनस्वर्गात्सर्वेनिराकृताः ६८ इंद्रोग्नीपितृना
स्तेनअग्नोदेवोहुताशनः सूर्यचंद्रादिकतोयान्यौवरुणोवायुरेवच ६९ सर्वमात्मकृतंतेनसत्पंसत्यंजनार्दन
देवलोकाद्वयंभ्रष्टाःसर्वस्थानविवर्जिताः ७० तस्यतद्वचनंश्रुत्वाकोपादरुणलोचनः श्रीभगवानुवा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ च हन्मि तं दानवं दुष्टं देवलोकभयंकरम् ७१ त्रिदशैः सहितस्तत्र गत्वा चंद्रावतीं पुरीं भगवद्वचनं श्रुत्वा हर्ष
मा॰ माना उदायुधाः देवाश्चंद्रावतीं जग्मुर्हंतुकामाः सुरद्विषः दृष्ट्वा देवैश्च दैत्येंद्रो गर्जमानास्तु दानवाः ७२ अ
७ संख्यातसहस्रैस्तु दिव्यप्रहरणायुधैः हन्यमानाश्च ते सर्वे सुरैश्च पुनः पुनः ७३ ततस्ते निर्जिता देवा गताश्चै
व दिशो दश हरिर्निरीक्षितस्तत्र तिष्ठ तिष्ठेति चाब्रवीत् ७४ हतावाणैः पुनर्दिव्यैर्यातास्त्रभयविह्वलाः
चक्रोमुक्तास्तु कालेन दैत्यसैन्येषु पाण्डव ७५ तेन छिन्नास्य शिरसो बहवो निधनं गताः एकाकी दानवः स्थि
त्वा युध्यमानो मुहुर्मुहुः ७६ नष्टास्तेन सुरास्सर्वे निर्जितो मधुसूदनः निर्जितेन तु देवेन बाहुयुद्धं तु याचितं ७
बाहुयुद्धं कृतं तेन दिव्यं वर्षसहस्रकं विलुब्धितां प्रपन्नो सो नष्टाः सर्वेपि देवताः ७८ विलुब्ध्वा त्रासितस्तेन ग
तो बदरिकाश्रमे गुहा सिंहवती नाम तत्र सुप्तो जनार्द्दनः ७९ द्वादशं योजनं मध्ये एकद्वारं धनंजय अहं
तत्र प्रसुप्तश्च भयभीतो न शंसयः ८० महायुद्धेन तत्रश्रांतो हं पाण्डुनंदन दानवो पृष्ठतो लग्नः प्रविष्टश्च
गुहां प्रति ८१ प्रसुप्तं च हरिं दृष्ट्वा दानवश्चाति हर्षितः शत्रुं मार्दजयं दृष्ट्वा प्रविष्टः शंकया हरिः ८२ निः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ए॰ सदेहंहन्तुमिच्छामि असुराणांक्षयंकरं निर्गताकन्यकातत्र जनार्दनशरीरतः ८३ रूपवंतीसुसौभाग्यादैत्यप्र
मा॰ हरणोद्युधा विष्णुतेजःसमुद्भूतामहाबलपराक्रमा ८४ दृष्टासादानवेंद्रेणमुरनाम्नेतिपांडव युद्धंसमीहितं
८ तेनस्त्रियातस्यप्रयाचितं ८५ साकन्यायुधातेनसर्वयुद्धविशारदा हुंकारोनिर्गतोरौद्रोभस्मीभूतोभवत्तदा
८६ निहतेदानवेतस्मिंनाग्रेदेवोपिउत्थितः पतितंदानवंदृष्ट्वाततोविस्मयमागतः ८७ केनवैनिहतोरौ
द्रोभस्मीभूतोतिदुर्जयः अद्भुतंचकृतंकर्म्ममकारुण्यताकृता ८८ नदेवानचगंधर्वानसमोस्यास्तिभूतले
विस्मयोपिहसंजातोवासपतीव शरीरिणां ८९ मयाचनिहतोदुष्टोदेवासुरभयंकरः जितायेनसुराःसर्वेस्वर्गाच्चै
वनिराकृताः ९० हरिस्सुप्तंततोदृष्ट्वास्थानेत्वत्रसमागतः त्रैलोक्यंसंहरिष्यामिपातितेचजनार्दने ९१ त
स्यास्तद्वचनंश्रुत्वाविष्णुर्वचनमब्रवीत् उपकारःकृतोभद्रेममकारुण्यताकृता ९२ दानवेनहिदुष्टेनसुराणांमा
यकारिणा अहंचनिर्जितस्तेनकथंसोपिनिपातितः ९३ विष्णोस्तुवचनंश्रुत्वातदावचनमब्रवीत् एकादशीत्व
हंविष्णोसर्वशत्रुविनाशिनी ९४ क्षीयमानान्सुरान्दृष्ट्वाप्रसुप्तेचजनार्दने लोकत्रयभयंकारीत्वत्प्रयोदुष्टद

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए० नवः ९५ मयाकुपितयाविष्णो निहतोहिमदानवः निहतंदानवंदृष्ट्वाकिमाश्चर्यमिदंप्रभो ९६ इतितस्यावचः
मा० श्रुत्वाविष्णुर्वचनमब्रवीत् तुष्टोस्म्यद्भुतकार्येणतुभ्यंदास्याम्यभिवांछितम् ९७ ममेप्सितंकृतंभद्रेउपकारश्च
९ सुश्रीणि निहतेदानवेंद्रेचसंतुष्टास्सर्वदेवताः ९८ हृष्टास्तुष्टाश्चतेदेवाश्चानंदंशक्रमागताः आनंदंत्रिषुलोके
षुमुनयोनंदितास्तथा ९९ ब्रूहित्वंवचनंभद्रेयत्तेमनसिरोचते निःसंदेहंददाम्येवयत्सुरैरपिदुर्लभं १०० ए
कादश्युवाच यदितुष्टोसिदेवेशमांप्रतित्वंचतुर्भुज अहंचलांश्वयेनितपंतादृशंकुरुमेप्रभो १ सर्वातिथिप्रध
नाचसर्वविघ्नविनाशिनी सर्वपापक्षयकरीआयुर्वित्तविवर्द्धिनी २ उपोष्यंतितवयेभक्तापापरामभक्तिजनार्द्दने
सर्वसिद्धिर्भवित्तेषांयदितुष्टोसिमाधव ३ उपवासेनयत्पुण्येनादर्द्धेनक्तभोजने नाकस्यार्द्धंचयत्पुण्यमेकभु
क्तोकोतसति ४ उपवासाद्दशगुणाच्चात्रौजागरणेकृते जागरणातमुच्यंतेपापैर्जन्मार्जितैःकृतैः ५ पूजया
धूपदीपैश्चभुक्तिमुक्तिसमन्विताः गर्भवासंनपश्यंतितादृशींकुरुमांप्रभो ६ श्रीभगवानुवाच यत्त्वंवद
सिकल्याणितत्सर्वंचभविष्यति धर्मकामार्थमोक्षाणांयत्त्वादेविसमाचरेत ७ ममभक्ताश्चयेलोकेतवभक्ता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए० ध्वसंतिते चतुर्युगेषुदिव्योतात्रिषुलोकेषुवैपर ८ तंचभक्त्यामहंमन्येएकादश्यांव्रतेस्थितं येमेपूजांकरिष्यं
मा० तिएकादश्यांनसंशयः ९ सर्वतिथ्युत्तमासाचमत्प्रसादाद्भविष्यति सर्वसिद्धिर्भवेत्तस्यएकादश्यामुपोषणा
१० त् १० तृतीयाचाष्टमीचैवनवमीचचतुर्दशी एकादशीविशेषेणतिथिरेषाहरिप्रिया ११ सर्वतिथ्याधिकंपुण्यं
मत्पांसत्यंनसंशयः एवंतस्यैवरंदत्वातिरोवाचोजनार्दनः १२ हृष्टातुष्टाचसंयाताएकादश्यापार्थार्जुन अ
न्यत्तयेप्रकुर्वंतिएकादश्यामहाव्रतम् १३ शत्रून्निहन्म्यहंतेषांददामिपरमांगतिं हरामिसर्वविघ्नानिसर्व
सिद्धिंददाम्यहं १४ एवमुक्त्वाततोवाचंतत्रैवांतरधीयत इयमेकादशीपार्थसर्वपापक्षयंकरी १५ एवंमातु
महापुण्यासर्वदेवैस्तुवंदिता पूजितासर्वलोकेपिसर्वसिद्धिकारीस्थितिः १६ यथाशुक्लातथाकृष्णाविभेदंनैव
कारयेत उभयोःपक्षयोःपार्थसमतुल्याचद्वादशी १७ अंतरंनैवकर्तव्यासमस्तैर्व्रतकारिभिः तिथिरेषाभवे
त्सर्वापक्षयोरुभयोरपि १८ उदयेएकादशीस्वल्पाअंतेचैवत्रयोदशी मध्येतुद्वादशीपूर्णात्रिस्पृशासाहरेःप्रिया
१९ एकामुपोषयेत्तांचसहस्रैकादशीफलं सहस्रगुणितंदानंत्रयोदश्यांतुपारणे २० अष्टम्येकादशीषष्ठी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ द्वितीयाचचतुर्दशी पूर्वविद्धानकर्त्तव्याकार्यापरसंयुता २१ एकामुपोषयेत्तांतुद्वादशीममवल्लभा दशमी
मा॰ चैवसंयुताहंतिपुण्यंपुराकृतम् २२ एकादशीअहोरात्रंप्रभातेघटिकाद्वयं सातिथिपरिकर्त्तव्याउपोष्याद्वा
११ दशीशुभा २३ एवंविधिंमयाप्रोक्तंपक्षयोरुभयोरपि एकादश्यांप्रकुर्वंतिउपवासंनसंशयः २४ तेषां
तिवैलवंस्थानंयत्रास्तेगरुड़ध्वजः धन्यास्तेमानवालोकेविष्णुभक्तिपरायणाः २५ एकादश्यांप्रकुर्व
न्तिउपवासंतुयेजनाः तेषांपुण्यस्यसंख्यानेनालंशक्तश्चतुर्मुखः २६ एकादश्याश्चमाहात्म्यंसर्वकालेषु
यःपठेत् गोसहस्रफलंतस्यपुण्यंप्राप्नोतिमानवः २७ दिवावायदिवारात्रौयःशृणोतिहिभक्तितः कुलको
टिसमायुक्तोविष्णुलोकेवसेन्नरः २८ एकादश्याश्चमहात्म्यंपदमेकंशृणोतियः ब्रह्महत्यादिपापानिन
श्यंतेनात्रसंशयः २९ विष्णुधर्मसमोनास्तिधर्मोनाःपाण्डुनंदन गीतार्थसदृशोपार्थोनैवशास्त्रेषुदृश्यते
३० एकादशीसमंनास्तिव्रतंपापप्रमोचनम् पठनाच्छ्रवणाद्राजन्नश्वमेधफलंलभेत् ३१ किमत्रबहुनो
क्तेनसंक्षेपादुच्यतेनघ एकादश्याव्रतेचीर्णेममतुष्टिर्भवेद्ध्रुवं ३२ इतिश्रीमत्स्यपुराणेश्रीकृष्णार्जुनसंवा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ देमार्गशीर्षेकृष्णपक्षैकादशीउत्पन्नामाहात्म्यंसमाप्तम् १ युधिष्ठिरउवाच वंदेविष्णुंप्रभुंसाक्षाल्लोकत्रयसु
मा॰ खावहं विश्वेशंविश्वकर्तारंपुराणंपुरुषोत्तमम् १ पृच्छामिदेवदेवेशसंशयोस्तिमहान्मम लोकानांचहि
१२ तार्थायपापानांक्षयहेतवे २ मार्गशीर्षेसितेपक्षेद्वादशीचैवकाभवेत् किंनामकोविधिस्तस्याः कोदेवस्तत्र
पूज्यते ३ एतदाचक्ष्वमेस्वामिन्विस्तरेणयथातथं श्रीकृष्णउवाच साधुपृष्टंत्वयाराजन्साधुतेविमलामा
तिः ४ कथयिष्यामिराजेंद्रहरिवासरमुत्तमं उत्पन्नाचासितेपक्षेद्वादशीममवल्लभा ५ मार्गशीर्षेच उत्पत्तिर्मे
मदेहसमुद्भवा पुरामुरवधार्थायचोत्पन्नाजनवल्लभा ६ कथितानमयासावैतवाग्रेराजसत्तम पूर्वमेकादशी
राजन्त्रैलोक्येसचराचरे ७ मार्गशीर्षसितायातुतांत्वंश्रोतुमर्हसि यस्याःश्रवणमात्रेणवाजपेयफलंलभे
त् ८ मोक्षाचनाम्नासाप्रोक्तासर्वपापहरापरा देवंदामोदरंचैवपूजयेत्तत्रयत्नतः ९ पूर्वेणविधिनाचैवदशमी
काद्शीतथा सामोक्षैकादशीनाम्नामहापातकनाशिनी १० श्रीकृष्णउवाच शृणुराजन्प्रवक्ष्यामिकथांपौ
राणिकींशुभां अधोयोनिंगताःसर्वेपितृमातृसुतादयः ११ अस्याःपुण्यप्रदानेनस्वर्गंयांतिनसंशयः एतस्मात्का

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ए॰ राणोदस्यामहिमानंन्नृपशृणु १२ पुरातुनगरेरम्येभुल्लोकेनावसन्नृपः वैषानशेतिराजर्षिःपुत्रवत्पालयत्प्रजाः
मा॰ १३ द्विजाश्चनावसंतत्रचतुर्वेदपारायणाः निधिमंतःप्रजास्तस्यवैषानस्यमहात्मनः १४ एवंसराज्यंकुर्वाणोरात्रौ
१३ तुस्वप्नमध्यतः सदद्दर्शस्वपितरमधोयोनिंगतंन्नृपः १५ एवंदृष्ट्वातथातंतुविस्मयोत्फुल्ललोचनः कथयामा
सवृत्तांतंद्विजेभ्योस्वप्नसंभवम् १६ राजोवाच मयातुस्वपितादृष्टोनरकेप्यगतोद्विजाः तारयस्वेतिमांतातमधो
योनिंगतंसुतं १७ ब्रुवाणःस्वतथैवंचमयादृष्टःपितास्वयं तदाप्रभृतिमोविप्राःनाहंशर्मलभामिवै १८ एतद्राज्यंम
ममहद्दुःखायराजारथाः अश्वागजरथाकोशोनकिञ्चित्सुखदंमम १९ नदारानसुतामह्यंरोचन्तेद्विजसत्तमाः
किंकरोमिक्वगच्छामिशरीरंमेतिदह्यते २० दानंव्रततपोयोगंकथयध्वंद्विजामम कृतेनयेनजनकःसद्गतिंलभेत
चमे २१ किंतेनजीवतालोकेसपुत्रेणानलोघसा पितातुयस्यनरकेतस्यजन्मनिरर्थकम् २२ ब्राह्मणाऊचुः प
र्वतस्यसमीपेस्त्रह्याश्रमोनिकटेन्नृप गम्यतांराजशार्दूलश्रुतम्भवान्विजानतः २३ तेषांश्रुत्वाततोवाक्यंविस्म
योराजसत्तमः जगामतत्रयत्रास्तेह्याश्रमोपर्वतोमुनिः २४ ब्राह्मणैर्वेष्टितःशांतैःप्रजाभिश्चसमंततः आगमो

ए॰ विपुलस्तस्याश्रमोमुनिभिःसंनिषेवितः २५ ऋग्वेदाथर्वणायजुःसामाध्ययनकोविदैः व वेष्टितोमुनिभिस्तत्रद्वितीयमिव
मा॰ पद्मभूः २६ दृष्ट्वातंमुनिशार्दूलंराजावैखानसस्तदा जगामचावनिंमूर्ध्नादण्डवत्प्रणनामह २७ पप्रच्छकुशलं
१४ तस्यसप्तस्वंगेषुसोमुनिः राज्येनिष्कंटकत्वंचराज्ञःसौख्यसमन्वितम् २८ राजोवाच तवप्रसादाद्विप्रकुशलंमेग
सप्तके भवतामनुकूलत्वंकथंनेष्यपिविघ्नता २९ मयास्वप्नेस्वयंदृष्टोजनकोदुर्गतिंगतः केनापिव्रतदानेनमोक्षस्तस्य
स्याभवेदथ ३० एतन्मेसंशयंब्रह्मन्नुक्त्वामहत्मागतः एतच्छ्रुत्वानृपवचःपर्वतोमुनिसत्तमः ३१ ध्यानस्तिमितनेत्रोऽ
सौभूत्संभाविव्यचिन्तयन् मुहूर्त्तमेकंध्यात्वाचप्रत्युवाचनृपोत्तमम् ३२ पर्वतउवाच जानेऽहंतवराजेन्द्रपितुःपापंविक
र्मिणः पुरापित्रातवनृपसपत्नीप्रोक्ताद्वेषतः ३३ कामासक्तेनचैवात्रऋतुभंगःकृतःस्त्रियाः त्राहिदेहीतिगदं
त्यानदत्तमृतुदानकम् ३४ कर्मणातेनपापेननरकेपतितोह्ययम् राजोवाच केनैवव्रतदानेनमोक्षस्तस्यभवेन्मु
ने ३५ निरयात्पापसंस्थानात्तन्मयाचक्ष्वपृच्छतः मुनिरुवाच मार्गशीर्षेसितेपक्षेमोक्षानाम्नीहरेस्तिथिः स
र्वैस्तुतद्व्रतंकृत्वापित्रेपुण्यंप्रदीयतां तस्याःपुण्यप्रभावेनमोक्षस्तस्यभविष्यति ३७ मुनेर्वाक्यंततःश्रुत्वानृपःस्व

ए॰ गृहमागतः आगत्य पितरं किं तं स्तुत्वा प्रोचे तं नृपम् ३८ आगतः पुत्रवैरैः सर्वैः मुनयो देवैश्च तदा नृपः व्रतं कृत्वा वि
मा॰ धानेन पुण्यं दत्तं नृपाय तत् ३९ तस्मिन्दत्ते तदा पुण्ये पुष्पवर्षं समभूद्दिवः वैकुण्ठं सपिता तत्र गतो मोक्षं सुतो गणैः
१५ ४० राजानमंतरिक्षात्स्वस्तुत्वा गिरमभाषत स्वस्त्यस्तु ते पुत्र मदेत्युक्त्वा स च दिवं गतः ४१ एवं यः कुरुते राजन्मोक्षा
मेकादशीं शुभां तस्य पापक्षयं याति नूनं मोक्षमवाप्नुयात् ४२ नातः परतरा काचिन्मोक्षदा विमला शुभा पुण्य
संख्यातु तेषां येनाहं जानामि येः कृता ४३ पठनाच्छ्रवणाच्चास्या वाजपेयफलं लभेत् चिंतामणिसमा ह्येषा स्व
र्गमोक्षप्रदायिनी ४४ इति श्रीब्रह्माण्डपुराणे मार्गशीर्षशुक्लमोक्षैकादशीमाहात्म्यं समाप्तम् २ युधिष्ठिर
उवाच पौषस्य कृष्णपक्षे तु का चैवैकादशी भवेत् किं नाम को विधिस्तस्याः को देवस्तत्र पूज्यते १ एतदाचक्ष्व मे
स्वामिन्विस्तरेण जनार्दन श्रीकृष्ण उवाच कथयिष्यामि राजेन्द्र भवतः स्नेहकारणात् २ तथा तुष्टिर्न मे राजन्क्रतु
भिर्भूरिदक्षिणैः यथा तुष्टिर्भवेन्मह्यमेकादश्या व्रतेन वै ३ तस्मात्सर्वप्रयत्नेन कर्तव्यं हरिवासरं पौषस्य कृष्ण
पक्षे तु द्वादशी या भवेन्नृप ४ तस्याश्चैवापि माहात्म्यं शृणुष्वैकाग्रमानसः आद्यिकाश्चैव या राजन्नेकादश्यो

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ भवंतिहि ५ तासामेवहिसर्वासांविकल्पनेनवकारयेत् अथाप्यस्याहिएकस्याः शृणुराजन्कथानकम् ६ अ
मा॰ तःपरंप्रवक्ष्यामिपौषस्यकृष्णैकादशी तस्याविधिंनृपश्रेष्ठलोकानांहितकाम्यया ७ पौषस्यकृष्णपक्षेयास
१६ फलानामनामतः नारायणोधिदेवोस्याःपूजयेत्तंप्रयत्नतः ८ पूर्वेणविधिनाराजन्कर्तव्यैकादशीजनैः
नागानांचयथाशेषःपक्षिणांगरुडोयथा ९ देवानांचयथाविष्णुर्द्विपदांब्राह्मणोयथा व्रतानांचयथारा
जन्वराएकादशीतिथिः १० तेजनाभरतश्रेष्ठममपूज्याश्चसर्वतः हरिवासरसंसक्ताकीर्तनैर्यजनाभुवि ११
सफलानामवैख्यातातस्याःपुण्यंशृणुष्वमे फलैर्मांपूजयेत्तत्रकालदेशोद्भवैःशुभैः १२ नारिकेरफलैशुद्धैः
तथावैबीजपूरकैः जंबीरैर्दाडिमैश्चैवतथापूगफलैरपि १३ लवंगैर्विविधैश्चान्यैस्तथैवाम्रादिभिःफलैः पू
जयेद्देवदेवेशंधूपदीपैर्यथाक्रमम् १४ सफलायांदीपदानंविशेषेणप्रदापयेत् रात्रौजागरणंतत्रकर्तव्यंचप्रय
त्नतः १५ पूर्वेणविधिनाराजन्कर्तव्यैकादशीजनैः यावदुन्मिषितंनेत्रंतावज्जागर्तियोनिशि १६ एकाग्रमान
सोभूत्वातस्यपुण्यंनृपशृणु तत्समोनास्तिवैयज्ञस्तीर्थंनतत्सदृशंनहि १७ नतत्समंव्रतंकिंचिदिहलोकेपरत्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ए. च पंचवर्षसहस्राणि तपस्तप्तेन यत्फलम् १८ तत्फलं सम्वाप्नोति सफलाजागरेण च श्रूयतां राजशार्दूल सफ
मा. लायाः कथानकम् १९ चंपावतीति विख्याता पुरी माहिष्मतस्य च माहिष्मतस्य राजर्षेश्चत्वारश्चाभवन्सुताः २०
१७ तेषां मध्ये तु यो ज्येष्ठः स महापापसंयुतः परदाराभिगामी च वेश्यासंगरतः सदा २१ पितुर्द्रव्यं तु पापिष्ठो गमयत्वे
वमन्वहम् असद्वृत्तिरतो नित्यं देवताद्विजनिंदकः २२ वैष्णवानां च देवानां नित्यं निंदारतः सदा ईदृग्विधं तदा
दृष्ट्वा पुत्रं माहिष्मतो नृपः २३ लुंबको नाम नाम्नेति विख्यातवान्नृपर्षिणः राज्यान्निःकाशितस्तेन पित्रा वै चापि
बंधुभिः २४ परैरपि जनैस्सर्वैस्त्यक्तो राज्ञो भयादपि लुंबकोपि तदा त्यक्तः चिंतयामास एव सः २५ मया त्यक्तं क्रिय
ते किं वै त्यक्तो न पितृबांधवैः इति चिंतापरो भूत्वा मतिं पापे तदाकरोत् २६ मया तु गम्यते वश्यं वनं त्यक्त्वा पुरं पितुः त
स्माद्गतो वनं घोरं लुंबको जीवघातकः २७ जीवघातपरो नित्यं स्तेयकर्मपरायणः सर्वं च मुषितं तेन नगरं पापकर्मणा
२८ गृहीतश्च परित्यक्तो लोकै राज्ञो भयात्ततः जन्मांतरस्य पापेन राज्याद्भ्रष्टः स पापकृत् २९ आमिषाहारनिरतो।
नित्यं च फलभक्षकः आश्रमे तस्य दुष्टस्य वासुदेवस्य संमतः ३० अश्वत्थो वर्तते तत्र जीर्णो बहुलवार्षिकः देवा।

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ त्वंतस्यावृक्षस्यवर्त्ततितद्वनेमहत् ३१ तत्रैववन्यवसत्वासौलुंबकःपापबुद्धिमान् एवंकालक्रमेणैववसतस्तस्यपापि
मा॰ नः ३२ विकर्मनिरतस्यापिकुर्वतःकर्मनिंदितं पौषस्यकृष्णपक्षेतुप्राप्तेहिसफलादिने ३३ दशम्यांदिवसेराज
१८ न्निशायांशीतपीडितः ततुवस्त्रविहीनोसौनिशायाम्बकुपीडितः ३४ निश्चेष्टोलुंबकस्तस्याश्वत्थस्यसमी
पतः नतंज्ञानसुखंतस्यागतःप्राणाइवाभवत् ३५ पीडयन्दशनैर्दंतानेवंसगमयन्निशाम् सूर्योदयेप्रभातेचनले
भेचेतनांहिसः ३६ लुंबकोगतसंज्ञस्तुसफलायादिनेतथा मध्याह्नसमयेप्राप्तेसंज्ञांलेभेसलुंबकः ३७ प्राप्तसं
ज्ञस्तदाराजनुत्थितोसौतदासनात् सचलितस्वपदन्यासैःशीवनंस्खलितोमुहुः ३८ वनमध्येततस्त्वैवक्षुत्तृड्
भ्यांपरिपीडितः नशक्तिर्जीवघातस्यलुंबकस्यदुरात्मनः ३९ फलानिभूमिपतितान्याजहारसलुंबकः फ
लान्यादायनिश्चेष्टोवृक्षमूलेपपातह ४० फलैरेभिःसभगवान्प्रीयतांमधुसूदन इत्युक्त्वाफलमूलानिवृक्षमू
लेन्यवेदयत् ४१ फलानांपूजनंमेनेसफलायादिनेहरिः प्रत्यक्षोभूज्जगन्नाथःशंखचक्रगदाधरः ४२ आ
लिंग्यतंराजपुत्रमाश्वास्यचपुनःपुनः उवाचभगवान्विष्णुर्मेघगांभीर्ययागिरा ४३ पितुस्समीपंगच्छत्वंभुंक्ष्वरा॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ ज्यमकाटकं देहंत्यक्त्वापुनर्वत्समममारूप्यमेष्यसि ४४ इत्युक्तोमतद्धैर्यविष्णुःसोपिगत्वातथाकरोत् पित्रा
मा॰ सम्मानितोराज्यंवैरिवृंदैर्विवर्जितं ४५ पुत्रेराज्यंसमर्प्याथवनंगत्वाहरिंस्मरन् त्यक्त्वाकलेवरंराजन्विष्णुलोक
१९ मवापह ४६ इत्थंविधंमयाप्रोक्तंसफलायाकथानकं अज्ञानेनव्रतंकृत्वालुंबकोहतकिल्बिषः ४७ भु
क्त्वाभोगाननातोलोकेवैकुंठेसमवल्लभम् त्वयापीतद्व्रतंराजन्प्रयत्नेनसमाचर ४८ पठनाच्छ्रवणाद्राजन्म
चातस्फलैपातकैः इतिश्रीपद्मपुराणेपौषकृष्णसफलैकादशीमाहात्म्यंसंपूर्णम ३ युधिष्ठिरउवाच कथितावै
त्वयाकृष्णसफलैकादशीशुभा कथयत्वंप्रसादेनशुक्लापौषस्ययाभवेत् १ किंनामकोविधिस्तस्याःकोदेव
स्तत्रपूज्यते कस्मैतुष्टोहृषीकेशस्त्वमेवपुरुषोत्तम २ श्रीकृष्णउवाच शृणुराजन्प्रवक्ष्यामिशुक्लापौषस्य
याभवेत् कथयामिमहाराजलोकानांहितकाम्यया ३ पूर्वेणविधिनाराजन्कर्तव्यैषाप्रयत्नतः पुत्रदानाम
नाम्नासौसर्वपापहरापरा ४ नारायणोधिदेवोस्याःकामनासिद्धिदायकः नातःपरतरंकिंचित्त्रैलोक्येसचरा
रे ५ विख्यातंतंयशस्विनंकरोतिवनरंहरिः शृणुराजन्प्रवक्ष्यामिकथांपापहरांपरां ६ चंद्रावत्यांपुरारम्यांचा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ सोऽद्राजासुकेतुमान् तस्याराज्ञीतथाराज्ञीचंपकीनामवर्तते ७ पुत्रहीनस्सराजावैकालोनीतोमनोरथैः नैवा
मा॰ त्मजंलब्धपोलेभेवंशकर्तारमेवतु ८ तेनैवराजधर्मेणचिंतितंबहुकालतः किंकरोमिक्वगच्छामिसुतप्राप्तिः
२० कथंभवेत् ९ तद्राष्ट्रेनपुरेसौख्यंलेभेराजासुकेतुमान् सतयाकांतयासार्द्धंप्रत्यक्षंदुःखितोभवत् १० तावुभौ
दंपतीनित्यंचिंताशोकपरायणौ पितरोस्यजलंदत्तंकवोष्णमुपभुंजते ११ राज्ञःपश्चान्नपश्यामोयोस्मान्संत
र्पयिष्यति एवंचिंतितस्यभूपस्यनराजाश्वपदादयः १२ इत्येवसंस्मरंतोस्यपितरोदुःखितोऽभवत् नबांधवान्
मित्राणिनामात्यासुहृदस्तथा १३ रोचंतेतस्यभूपस्यनगजाश्वापदादयः नैराश्यंभूपतेस्तस्यनित्यंमनसिवर्त
ते १४ नरस्यपुत्रहीनस्यनैवास्तिजन्मनःफलं अपुत्रस्यगृहंशून्यंहृदयंदुःखितंसदा १५ पितृदेवमनुष्या
णांनानृण्यत्वंसुतंविना तस्मात्सर्वप्रयत्नेनसुतमुत्पादयेन्नरः १६ इहलोकेयशस्तेषांपरलोकेशुभागतिः
येषांतुपुण्यकर्तॄणांपुत्रजन्मोगृहेभवेत् १७ आयुरारोग्यसंपत्तिस्तेषांगेहेप्रवर्तते पुत्रजन्मभवेत्तेषांलोका
नांपुण्यकारिणाम् १८ पुण्यंविनानचप्राप्तिर्विष्णुभक्तिंविनातथा एवंविचिंतयमानोसौनशर्मलभतेनृपः १९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ प्रत्यूषे चिंतयेद्राजा निशि चिंतयते तथा स्वयमात्मविनाशं च चिंतयामास केतुमान् २० आत्मघातं दुर्गतिं च चिंत-
मा॰ यित्वा तदा नृपः दृष्ट्वात्मदेहं पलितमपुत्रत्वं तथैव च २१ पुनर्विचार्यात्मवधाद्यात्मनो हितकारणम् अश्वा-
२१ रूढस्ततो राजा जगाम गहनं वनम् २२ पुरोहितादयः सर्वे न जानंति गतं नृपम् गंभीरे विपिने राजा मृगपक्षिनिषेविते
२३ विचचार तदा राजा वनवृक्षान्विलोकयन् वटानश्वत्थबिल्वांश्च खर्जूरान्पनसांस्तथा २४ बकुलान्सप्त-
पर्णांश्च तिंदुकांस्तिलकांस्तथा शालांस्तालांस्तमालांश्च ददर्श सरलान्नृपः २५ इंगुदीककुभांश्चैव श्लेष्मा-
तकविभीतकान् शल्लकीकरमर्दांश्च पाटलीखदिरानपि २६ शाकांश्चैव पलाशांश्च शोभितान्ददृशे नृपः
मृगान्व्याघ्रवराहांश्च सिंहान्मास्तान्मृगानपि २७ गवयान्कृष्णसारांश्च शृगालान्शशकानपि वनमार्जारिक-
ान्क्रूरान्शल्लकांश्चरानपि २८ ददर्श भुजगान्राजा वल्मीकादभिनिःसृतान् गध्यादनगतान्मत्तान्कलभैः
सह संगतान् २९ यूथपांश्च चतुर्दंतान्करिणीमध्यसंगतान् तान्दृष्ट्वा चिंतयामास आत्मनः स गजान्नृपः ३०
तेषामतिचरन्मध्ये राजा शोभामवाप ह महदाश्चर्यसंयुक्तं ददर्श विपिनं नृपः ३१ क्वचिच्छिवारुतं घोरं वनुलूक

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ विचरंस्तथा तांस्तान्पक्षिमृगान्पश्यन्बभ्रामवनमध्यगः ३२ एवंददर्शगहनंनृपोमध्यगतेरवौ क्षुत्तृड्भ्यां
मा॰ पीडितोराजाइतश्चेतश्चधावति ३३ चिंतयामासनृपतिःशुष्ककंठगलकंधरः मयातुकिंकृतंकर्मप्राप्तंदुःखंयदीदृ
२२ शं ३४ मयावैतोषितादेवायज्ञैःपूजाभिरेवच तथैवब्राह्मणादानैस्तोषिताःप्रियभोजनैः ३५ प्रजाश्चैवसदाका
लंपुत्रवत्परिपालिताः कस्माद्दुःखंमयाप्राप्तमीदृशंदारुणंमहत् ३६ इतिचिंतापरोराजाजगामचाग्रतोवनम्
सुकृतस्यप्रभावेनसरोदृष्टमनुत्तमं ३७ मानसस्पर्द्धमानं ३८ चपद्मिन्यापरिशोभितं कारंडवैश्चक्रवाकैराज
हंसैश्चशोभितं मकरैर्बहुभिर्मत्स्यैरन्यैर्जलचरैर्युतं समीपेसरसस्तत्रमुनीनामाश्रमान्बहून् ३९ ददर्शराजा
लक्ष्मीवान्शकुनैःशुभसंसिभिः अपसव्यंस्फुरन्नेत्रमपसव्यस्तथाकरः ४० स्फुरन्दैवनृपतेस्तस्यकथयन्शोभ
नंफलं तस्यतीरेमुनीन्दृष्ट्वाकुर्वाणान्नैगमंजपम् ४१ हर्षेणमहताविष्टोबभूवनृपसत्तमः अवतीर्यहयात्तस्मा
न्मुनीनामग्रतःस्थितः ४२ पृथक्पृथक्ववंदेऽथमुनीस्तान्संशितव्रतान् कृतांजलिपुटोराजादंडवच्चपुनः
पुनः ४३ प्रत्यूचुस्तेपिमुनयःप्रसन्नाःस्मनृपतेवयम् राजोवाच किंभवंतोऽत्रतपंतेकावाख्याभवतामिह ४४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ए॰ किमर्थंसंगतायूयंसत्यंवदतमेग्रतः मुनयऊचुः विश्वेदेवावयंराजन्नित्यंस्नानार्थमागताः ४५ माघोनिक
मा॰ टमायातएतस्मात्पंचमेहनि अद्यएकादशीराजन्पुत्रदानामनामतः ४६ पुत्रंदद्याद्दसौविष्णुःपुत्रदाकारी
२३ णांन्टप राजोवाच एषवैशंसयोमह्यंपुत्रस्योत्पादनेमहान ४७ यदितुष्टाभवंतश्चपुत्रमेदीयतांतदा मुनयऊचुः
अद्यैवदिवसेराजन्पुत्रदानामवर्तते ४८ एकादशीतिविख्याताक्रियतांव्रतमुत्तमं अभिषेकस्ततोस्माकंकेशवस्य
प्रशादतः ४९ अवश्यंतवराजेंद्रपुत्रप्राप्तिर्भविष्यति इत्येवंवचनंतेषांकृतंराजाव्रतोत्तमम् ५० मुनीनामुप
देशेनपुत्रदायाविधानतः द्वादश्यांपारणंकृत्वामुनीन्नत्वापुनःपुनः ५१आजगामगृहंराजाराज्ञीगर्भमथोद
धौ पुत्रोजातस्तथाकालेतेजस्वीपुण्यकर्मकृत् ५२ पितरंतोषयामासप्रजापालोवभूवसः एतस्मात्कारणाद्रा
जन्कार्यंवांपुत्रदाव्रतम् ५३ लोकानांतुहितार्थायतवाग्रेकथितंमया एकचित्तास्तुयेमर्त्याःकुर्वन्तिपुत्रदाव्रतं ५४
पुत्रान्प्राप्येहलोकेतुमृतास्तेस्वर्गगामिनः इतिश्रीब्रंह्माण्डपुराणेपौषस्युक्लपुत्रदेकादशीमाहात्म्यंसंपूर्णम
४ युधिष्ठिरउवाच माघस्यकृष्णपक्षेतुकिंनामैकादशीभवेत् किंदानंकोविधिस्तस्याःकोदेवस्तत्रपूज्यते १

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए. श्रीदालभ्यउवाच एकदामुनिशार्दूलंगभस्तिंवन्हिोजसं दालभ्यःपरिपप्रच्छयन्मांत्वंपरिपृच्छसि २ दालभ्यउ
मा. वाच मर्त्यलोकमनुप्राप्ताःपापंकुर्वन्तिजंतवः ब्रह्महत्यादिपापैश्चअन्यैस्तेयादिकैस्तथा ३ पीडिताःसुने
२४ संदेहःप्राप्तेकालस्यविप्लवे परद्रव्यापहारीचपरस्यव्यसनेहितः ४ कथंनगच्छेन्नरकान्ब्रह्मन्तेनंद्रस्तत्वतः
अनायासेनभगवान्दानेनाल्पेनकेनचित् ५ पापंप्रशमनंयातितेनतद्वक्तुमर्हसि गर्भस्तिरुवाच साधुसाधु
महाभागगुह्यमेतद्गुदाहृतम् ६ यन्नकस्यचिदाख्यातंरुद्रब्रह्मेन्द्रदैवतैः तदहंकथयिष्यामित्वयापृष्टोद्विजो
त्तम ७ माघमासेतुसंप्राप्तेशुचिःस्नातोजितेंद्रियः कामक्रोधअहंकारःलोभपैशून्यवर्जितः ८ देवदेवंनमः
स्कृत्यपादौप्रक्षाल्यवारिभिः भूपृष्ठप्रतिसंगृह्यगोमयंतत्रवानघः ९ तिलान्प्रक्षिप्यकार्पासंपिण्डिकांस्ते
नकारयेत् अष्टोत्तरशतंचैवनात्रकार्याविचारणा १० ततश्चमाघेचसंप्राप्तेआर्द्रादैवभवेदिति मूलंवाकृष्णपक्ष
स्यएकादश्यांतुकारयेत् ११ गृह्णीयाच्चपुष्पफलंविधानंतत्रमेशृणु देवदेवंसमभ्यर्च्यसुस्नातःप्रयतःशुचिः १२
कृष्णनामानिसंकीर्त्यपूजोपचारणादिषु रात्रौजागरणंकुर्याद्वश्चौहोमंचकारयेत् १३ अर्चयेद्देवदेवेशंशंखचक्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए· ऋगदाघरं चंदनागुरुकर्पूरैर्नैवेद्यशर्करादिभिः १४ संस्मृत्य नाम्ना चा ततः कृष्णमेव पुनः पुनः कूष्माण्डैर्नारिके
मा· लैश्च अथवा बीजपूरकैः १५ सर्वाभावे पि विप्रेंद्र शस्तं पूगीफलं तथा अर्घं दद्याद्विधानेन पूजयित्वा जनार्दनम् १६
२५ कृष्ण कृष्ण कृपालो त्वमगतीनां गतिर्भव संसारार्णवमग्नानां प्रसीद पुरुषोत्तम १७ नमस्ते पुंडरीकाक्ष नमस्ते
विश्वभावन सुब्रह्मण्य नमस्तेस्तु महापुरुषपूर्वज १८ गृहाणार्घ्यं मया दत्तं लक्ष्म्या सह जगत्पते इतिमंत्रः त
ततस्तु पूजयेद्विप्रमुदकुंभं तु दापयेत् १९ छत्रोपानहवस्त्रैश्च कृष्णो मे प्रीयतामिति कृष्णा धेनुः प्रदातव्या यथाश
क्त्या द्विजोत्तम २० तिलपात्रं द्विजश्रेष्ठ दद्यात्तु प्रयत्नतः स्नानप्राशनयोः शस्ताः देयाः कृष्णतिला मुने २१ ति
लस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी तिलदाता च भोक्ता च षट्तिला पापनाशनी २२ युधिष्ठिर उवाच ष
ट्तिलैकादशीं कृत्वा कीदृशं श्रूयते फलं सोपाख्यानं मम ब्रूहि यदि तुष्टोसि यादव २३ शृणु राजन् यथा पूर्वं दृष्टा
संकथयामि ते मर्त्यलोके पुरा ह्यासीद्ब्राह्मणी व्रतकर्शिता २४ मासोपवासनिरता मम भक्त्या च सर्वदा कृष्णोपवा
सान्नं युक्ता मम पूजापरायणा २५ शरीरं क्लेशितं तेन उपवासैर्द्विजोत्तम देवता ब्राह्मणानां च कुमारीणां च भक्तितः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए० गृहाणिसाप्रगृह्णंतीसर्वकालेमहासती तेषांद्रविणदानेनतर्पयंतीस्वनीतितः २७ अतिकष्टरतासावैसर्वका
मा० लेषुसुव्रता नदत्ताभिक्षवेभिक्षांब्राह्मणानांचतर्पिताः २८ कालेनमहताविप्रईश्वरेणाविचिंतितं शुष्कमस्याः
२६ शरीरंतुव्रतकष्टैर्नसंशयः २९ अर्चितंवैष्णवंलोकंस्वपुण्यैर्नात्रसंशयः २९ नदत्तमन्नदानंहियेनतृप्तिःपराभ
वेत् ३० एकंज्ञात्वामर्त्यलोकाद्ब्रह्मलोकादुपागतः कपिलंरूपमास्थायभिक्षामात्रेणयाचिता ३१ ब्राह्मण्यु
वाच कस्मात्त्वमागतोविप्रवदसत्यंममाग्रतः पुनरेवमयाप्रोक्तादेहिभिक्षांचसुंदरी ३२ तयाकोपेनमहतामृत्पिं
डंताम्रभाजने क्षिप्तंतावतायाविप्रःपुनःस्वर्गंगतस्ततः ३३ ततःकालेनमहतातापसीसुमहाव्रता देहेनसहि
तास्वर्गेकल्पवृक्षप्रभावतः ३४ गतासाब्राह्मणीविप्रतपश्चर्याव्रतादिभिः मृत्पिंडस्यप्रसादेनगृहंप्राप्तंमनो
रमं ३५ सुंदरंतुद्विजश्रेष्ठधान्यराशिविवर्जितं तयानिरीक्षितंगेहंधान्यराशिविवर्जितं ३६ तद्दृष्ट्वासाविनिः
क्रांतागताकेशवसन्निधौ क्रोधेनमहताविष्टाइदंवचनमब्रवीत् ३७ मयाव्रतैश्चकृच्छ्रैश्चउपवासैरनेकशः ए
जयाराधितोदेवःसर्वलोकस्यभावनः ३८ नतत्रदृश्यतेकिंचिद्गेहेममजनार्दन ततश्चोक्तंमयातस्यैगृहंगम्यतां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ए॰ गताः ३९ आगमिष्यंतिसुतरांकौतूहलसमन्विताः देवपालोहित्वांद्रष्टुंविस्मयेनसमन्वितः ४० द्वारंनोद्घा
मा॰ टनीयंहिषट्तिलापुण्यभार्यया भवत्याप्राप्यतांभद्रेयुष्मत्कामंभविष्यति ४१ एवमुक्तामयासातुमतावैमानुषी
२७ तदा अथांतरेतुसंप्राप्तेदेवपत्न्योहिजोत्तम ४२ ताभिश्चकथितंतत्रत्वांद्रष्टुंहिसमागताः द्वारमुद्घाटयत्वं
चपश्यामित्वांहिशोभने ४३ मानुष्यवाच यदिद्रष्टुंसमायातामामत्वंब्रूतविशेषतः षट्तिलायादत्तपुण्यंमहद्वारो
द्घाटकारणम् ४४ एकापितत्रविप्रर्षेनवदंतीमहाव्रतं अन्ययाकथितंतत्रदृष्टव्यामानुषीमया ४५ षट्ति
लायास्मयादत्तपुण्यंवांछितदायकम् ततोद्वारंसमुद्घाट्यदृष्टाताभिश्चमानुषी ४६ नदेवीनचगांधर्वीनासु
रीनचपन्नगी पूर्वदृष्टानयातुल्यायाद्दृशीयंद्विजर्षभ ४७ रूपकांतिसमायुक्ताक्षणेनप्रतिपद्यत धनंधान्यं
चवस्त्राणिसौवर्णंरूप्यमेवच ४८ सर्वंभवनसंपन्नंषट्तिलायाःप्रभावतः अतितृष्णानकर्तव्यावित्तशाठ्यंन
कारयेत् ४९ आत्मवित्तानुसारेणतिलान्वस्त्राणिदापयेत् लभतेचैवभाग्यानिनरोजन्मनिजन्मनि ५० नदारि
द्र्यंनकष्टत्वंनचदौर्भाग्यमेवच लभतेवैद्विजश्रेष्ठषट्तिलायामुपोषणात् ५१ अनेनविधिनाविप्रतिलदातानस

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए. प्रत्ययः मुच्यते पातकैः सर्वैरनायासेन मानवः २२ दानानां च विधिना प्राप्तं सर्वपातकनाशनम् श्रीकृष्ण उवाच श्री
मा. तस्य वक्त्रः श्रुत्वा ग्रमहिमे मुनिसत्तमः २३ दाल्भ्यो मुनिशार्दूलः संतोषं परमं ययौ पठनाच्छ्रवणाद्राजन्वाजपेय
२८ फलं लभेत् २४ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति इति श्रीब्रह्माण्डपुराणे माघकृष्णैकादशीमाहात्म्यं समाप्त
म् युधिष्ठिर उवाच साधु कृष्ण त्वया प्रोक्तमादिदेवो भवान्प्रभुः स्वेदजाश्चाण्डजाश्चैव उद्भिज्जाश्च जरायुजाः १
तेषां कर्ता विकर्ता त्वं पालकः क्षयकारकः माघस्य कृष्णपक्षे तु षट्तिला कथिता त्वया २ शुक्ले चैकादशी देव
कथयस्व प्रसादतः किंनामको विधिस्तस्याः को देवस्तत्र पूज्यते ३ श्रीकृष्ण उवाच कथयिष्यामि राजेन्द्र शुक्ले
माघस्य या भवेत् जयानामेति विख्याता सर्वपापहरा वरा ४ पवित्रा पापहन्त्री च कामदा मोक्षदा तथा नातः प
रतरा काचित् पापघ्नी मोक्षदायिनी ५ एतस्मात्कारणाद्राजन्कर्तव्या सा प्रयत्नतः श्रूयतां राजशार्दूल कथा पौरा
णिकी शुभा ६ पद्मजे च पुराणेऽस्या महिमा वर्णितो मया एकदा नाकलोके इन्द्रो राज्यं चकार ह ७ देवास्तत्र सुखे
नैव निवसन्ति मनोरमाः पीयूषपाननिरता अप्सरोभिश्च सेविताः ८ नंदनं तु वनं तत्र पारिजातोपशोभितम् ९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ रमंतिरमंत्यन्नप्सरोभिर्दिवौकसः ९ एकदारममागतोसौदेवेंद्रःस्वेच्छयान्वगा नर्तयामासहर्षेणपंचाशत्कोटि
मा॰ नायिकाः १० गंधर्वास्तत्रगायंतितन्मध्येपुष्पदंतकः चित्रसेनसुतस्तत्रगीतवाद्यपरायणः ११ मालिनीति
२४ चनाम्नातुचित्रसेनस्ययोषिता मालिन्यांतुसमुत्पन्नापुष्पदंतीतिनामतः १२ पुष्पदंतस्यपुत्रोवैमाल्यवान्नाम
नामतः पुष्पदंतीतुतेनैवमाल्यवतातिमोहिता १३ मदनस्यशरैस्तीक्ष्णैर्विद्धांगीसाबभूवह तयाहावैःकटाक्षै
श्चमाल्यवांश्चवशीकृतः १४ लावण्यरूपसंपन्नातस्यारूपंनिबोधमे बाहूतस्याःसुकामेनकंठपाशौकृताविव
१५ कर्णायतेचनयनेरक्तांतेघूर्णितेतथा पीनोन्नतौकुचौतस्यास्तौहेमकलशाविव १६ कर्णौतुशोभितौत
स्याःकुंडलाभ्यांनृपोत्तम कंबुग्रीवायुतासैवदिव्याभरणशोभिता १७ अतिक्षामांकटिंतस्याःमुष्टिग्राह्यांनृपोत्त
मम् नितम्बोविपुलश्चास्याविस्तीर्णंजघनस्थलम् १८ चरणौशोभमानौतौरक्तोत्पलसमद्युती ईदृश्यापुष्प
दंत्यान्माल्यवानतिमोहितः १९ शक्रस्यपरितोषायनृत्यार्थंतौसमागतौ २० मदनाग्निपरीतांगौपुष्पदन्तौ
चमाल्यवान् परस्परानुरागेणव्यामोहवशमागतौ २१ ज्ञात्वाविलर्षभस्तत्रसंगतंमानसंतयोः कालक्रिया

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए० मानलोपात्तथागीतविभंजनात् २२ चिंतयित्वातुमघवाअवज्ञानंतथात्मनः कुपितश्चतयोर्रुष्टःशापंदास्यन्नि
मा० दंजगौ २३ धिग्वांपापरतौमूढावाज्ञाभंगकारौमम युवांपिशाचौभवतांदंपतीरूपधारिणौ २४ मर्त्यलोकमनुप्रा
३० प्तौभुंजानौकर्मणःफलम् एवंमघवताशप्तावुभौदुःखितमानसौ २५ हिमवंतंगिरिंप्राप्ताविंद्रशापविमोहितौ
उभौपिशाचतांप्राप्तौदारुणंदुःखमेवच २६ संतप्तमानसौतत्रमहाकष्टगतावुभौ गांधर्वमप्सरत्वंचनजानं
तौविमोहितौ २७ पीडामानौतुदाहेनदेहपातजिनतौ ननिद्रांनसुखंशांतिंलेभातेकर्मपीडितौ २८ परस्परंवा
दमानौचेरतुर्गिरिगह्वरे पीडामानौतुशीतेनतुषारप्रभवेनतौ २९ दंतघर्षंप्रकुर्वाणौरोमांचितवपुर्धरौ ऊचे
पिशाचकस्तुचिंतांस्वपत्नींचपिशाचिकाम् ३० किमावाभ्यांकृतंपापंदारुणंलोमहर्षणम् येनप्राप्तंपिशाच
त्वंस्वेनदुःखात्तकर्मणा ३१ नरकंदारुणंमत्वापिशाचत्वंचदुःखदम् तस्मात्सर्वप्रयत्नेनपातकंनसमाचरेत्
३२ इतिचिंतापरौतत्रतावास्थांदुःखकर्षितौ देवयोगात्तयोःप्राप्तामाघस्यैकादशीसिता ३३ जयानामेतिवि
ख्यातातिथीनामुत्तमातिथिः तस्मिन्दिनेतुसंप्राप्तेतावाहारविवर्जितौ ३४ आसातांतत्रन्दपतेजलपानेन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए· वर्जितौ नक्तौजीवघातश्चनपत्रफलभक्षणात् ३५ अश्वत्थस्यसमीपेतौपतितौदुःखसंयुतौ रविरस्तंगतोराज
मा· न्तथैवस्थितयोस्तयोः ३६ प्राप्ताचैवनिशाघोरादारुणाप्रीतिकारिणी वेपमानौततस्तौतुशीतेनचजडीकृतौ
३१ ३७ परस्परेणसंलग्नौगात्रयोर्भुजयोरपि ननिद्रांनरतिंतत्रनतौसौख्यमविंदतौ ३८ एवंतौराजशार्दूलशापेने
न्द्रस्यपीडितौ शीतार्तयोर्दुःखितयोर्जगाममाघनिशोषितौ ३९ मार्तण्डेउदयंप्राप्तेद्वादशीदिवसागमे म
यातुराजशार्दूलतयोर्भक्तिर्धृताहृदि ४० जयायास्तुव्रतेचीर्णेरात्रौजागरणेकृते तस्माद्व्रतप्रभावाच्चयथाद्या
सौतथाशृणु ४१ द्वादशीदिवसेप्राप्तेतथाचीर्णेजयाव्रते विष्णुप्रसादान्नृपतेपिशाचत्वंतयोर्गतम् ४२
पुष्पदंतीमाल्यवंतौपूर्वरूपौवभूवतुः पुरातनस्नेहयुतौपूर्वालंकारधारिणौ ४३ विमानमधिरूढौतावप्स
रोगणसेवितौ स्तूयमानौतुगंधर्वैस्तुंवुरुप्रमुखैस्तथा ४४ हावभावसमायुक्तौगतौनाकेमनोरमे देवेंद्रस्य
।अग्रतोगत्वाप्रणामौचक्रतुर्मुदा ४५ तथाविधौततोदृष्ट्वामघवाविस्मितोब्रवीत् इंद्रउवाच वदतांकेनपुण्ये
नपिशाचत्वंहिवांगतं ४६ ममशापवशंप्राप्तौकेनदेवेनमोचितौ माल्यवानुवाच वासुदेवप्रसादेनजयाया

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए· सुव्रतेन ४७ पिशाचत्वंगतःस्वामिंस्तवभक्तिप्रभावतः इतिश्रुत्वावचस्तस्यप्रत्युवाचसुरेश्वरः ४८ य
मा· स्त्वितामुभौजातौवंदनीयौममापिवा हरिवासरकर्तारौविष्णुभक्तिपरायणौ ४९ हरिभक्तिरतायेचविष्णुव्रतर
५२ तास्तथा अस्माकमपितेमर्त्याःपूज्यावंद्यानसंशयः ५० एवंत्वंपुष्पदंत्यात्वंयथासौख्यंसुरालये श्रीकृष्णउ
वाच एतस्मात्कारणाद्राजन्कर्तव्यंहरिवासरम् ५१ जयातुराजशार्दूलब्रह्महत्यापहारिणी सर्वदानानिदत्ता
नियज्ञास्तेनकृतान्नृपः ५२ सर्वतीर्थेषुसुस्नातःकृतंयेनजयाव्रतम् यःकरोतिनरोभक्त्याश्रद्धायुक्तोजयाव्रतं ५३
कल्पकोटिशतंयावद्वैकुंठेमोदतेचिरम् पठनाच्छ्रवणाद्राजन्नग्निष्टोमफलंलभेत् ५४ इतिश्रीभवि
ष्योत्तरपुराणेमाघस्यशुक्लैकादश्यामाहात्म्यंसमाप्तम् युधिष्ठिरउवाच फाल्गुनस्यासितेपक्षेकिंनामैकादशीभ
वेत् कथयस्वप्रसादेनवासुदेवममाग्रतः १ श्रीकृष्णउवाच फाल्गुनस्यासितेपक्षेविजयैकादशीतुया नारद
स्तांतुपप्रच्छब्रह्माणंकमलासनम् २ नारदउवाच फाल्गुनस्यासितेपक्षेविजयानामयाभवेत् तस्याःपुण्यंसु
रश्रेष्ठकथयस्वप्रसादतः ३ ब्रह्मोवाच शृणुनारदवक्ष्यामिकथांपापहरांपराम् यन्नकस्यचिदाख्यातंमये

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए० तद्विजयाव्रतम् ४ पुण्येनं व्रतं ह्येतत्पवित्रं पापनाशनं जयं ददाति विजयान्नृपाणां वैन संशयः ५ पुरा रामोव
मा० नं यातो वर्षाण्येकचतुर्दश न्यवसत्पंचवट्यां च ससीतः सहलक्ष्मणः ६ तत्रैव वसतस्तस्य रामस्य विजितात्मनः
३३ रावणेन हृता लोभाद्भार्या सीता यशस्विनी ७ तेन दुःखेन रामोसौ मोहमभ्यागतस्तदा गतवान्परमं स्थानं कृप
याघूर्णमानसः ८ भ्रमन्जटायुषमथो ददर्श तं गतायुषं मायया मानुषीं चेष्टां कुर्वाणो ब्रह्मवाक्यतः ९ कवंधो
निहतः पश्चाद्भ्रमतारण्यमध्यतः सुग्रीवेण समं तस्य सख्यमित्वं समभूत्तदा १० वानराणामनीकानि रामार्थे संगता
नि च ततो हनुमता दृष्टा लंकोद्याने तु जानकी ११ रामसंज्ञापनं तस्यै दत्वं कर्म महत्कृतं समेत्य रामेणा पुनः सर्वं
तत्र निवेदितम् १२ अथ श्रुत्वा रामचंद्रो वाक्यं चैव हनूमतः सुग्रीवानुमतेनैव प्रस्थानं समरोचयत् १३ स गत्वा
वानरैः सार्द्धं तीरं नदनदीपतेः दृष्ट्वाब्धिं दुस्तरं रामो विस्मयोत्फुल्ललोचनः १४ अगाधो तित रामेण पादो भिश्च
समाकुलः उपायं नैव पश्यामि येनैव सुतरो भवेत् १५ लक्ष्मण उवाच आदिदेवस्त्वमेवासि पुराणः पुरुषोत्तमः
वकदाल्भ्यो मुनिश्चात्र वर्त्तते द्वीपमध्यगः १६ अस्मात्स्थानाद्योजनार्द्धे माश्रमस्तस्य राघव अनेन दृष्टा ब्रह्माणो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए० वदस्वोरघुनंदन १७ तंपृष्ट्वागत्वाराजेंद्रपुराणमृषिपुंगवम् इतितस्योदितंश्रुत्वालक्ष्मणस्यातिशोभनं १८ जगा

मा० मराघवोद्रष्टुंवकदाल्भ्यमहामुनिं प्रणनाममुनिंमूर्ध्नारामोविष्णुर्यथामरः १९ ज्ञात्वामुनिस्ततोरामंपुराणपुरुषोत्त

३६ मम् केनापिकारणेनैवप्रविष्टंमानुषींतनुं २० उवाचसऋषिस्तुष्टःकुतोरामत्वमागतः श्रीरामउवाच भवत्प्र

सादतोविप्रतीरंनदनदीपतेः २१ आगतोस्मिससैन्योत्रलंकांजेतुंसराक्षसाम् भवताश्चानुकूल्येनतीर्यतेविधिर्यथाम

या २२ तदुपायंवदमुनेप्रसादंकुरुसुव्रत एतस्मात्कारणाद्देवप्रष्टुंत्वांसमुपागतः २३ मुनिरुवाच कथयिष्या

म्यहंरामव्रतानामुत्तमंव्रतं कृतेनयेनसहसाविजयस्तेभवेद्ध्रुवम् २४ लंकांजित्वाराक्षसांश्चशाश्वतींकीर्ति

माप्स्यसि एकाग्रमनसोभूत्वाव्रतमेतत्समाचर २५ फाल्गुणस्यासितेपक्षेविजयैकादशीभवेत् तस्याव्रतेनरा

जन्विजयस्तेभविष्यति २६ निःसंशयंसमुद्रंचसंतरिष्यसिराघव विधिस्तुश्रूयतांरामव्रतस्यास्यफलप्रदः २७

दशम्यांदिवसेप्राप्तेकुंभमेकंतुकारयेत् हैमंतुराजतंवापिताम्रंवाप्यथमृन्मयं २८ स्थापयेच्छोभितंकुंभंजल

पूर्णंसपल्लवम् तस्योपरिन्यसेद्देवंहैमंनारायणंप्रभुम् २९ एकादशीदिनेप्राप्तेप्रातःस्नानंसमाचरेत् निश्चलं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ स्थापयेत्कुंभंजलपूर्णंसपल्लवम् ३० तस्योपरिस्थितंदेवंशांखचक्रगदाधरम् दाडिमैर्नालिकेरैश्चपूजयेद्वविशे
मा॰ षतः ३१ सप्तधान्यानाधस्त्वस्थापयवान्नुपरिविन्यसेत् गंधधूपैस्तथादीपैर्नैवेद्यैर्विविधैरपि ३२ कुंभाग्रेतद्दिनंराम
३५ नीयतेभक्तिभावतः रात्रौजागरणंचैवतस्याग्रेकारयेद्बुधः ३३ द्वादश्यांदिवसेप्राप्तेमार्तंडस्योदयेसति नीत्वा
कुंभंजलोद्देशेनद्याःप्रस्रवणेतथा ३४ तडागेस्थापयित्वातुपूजयित्वायथाविधिः दद्यात्सदैवतंकुंभंब्राह्मणे
वेदपारगे ३५ कुंभेनसहराजेंद्रमहादानानिदापयेत् अनेनविधिनारामयूथपैःसहसंगतः ३६ कुरुव्रतंप्रय
त्नेनविजयस्तेभविष्यति इतिश्रुत्वाततोरामोयथोक्तमकरोत्तदा ३७ कृतेव्रतेसविजयीबभूवरघुनंदनः प्राप्ता
सीताजितालंकारावणोनिहतस्तथा ३८ एतस्मात्कारणाद्धिप्रकर्त्तव्यंविजयाव्रतं पठनाच्छ्रवणाच्चैववाजिपेयफ
लंलभेत् ३९ इतिश्रीस्कंदपुराणेफाल्गुणकृष्णपक्षेविजयैकादशीमाहात्म्यंसमाप्तं श्रीरामउवाच एकाद
श्यास्तुमाहात्म्यंमहत्पुण्यफलप्रदं ऋक्षयोगेनसंयुक्ताकथयस्वमहामुने १ वशिष्ठउवाच जयाचविजयाचै
वजयंतीपापनाशिनी सर्वपापहराचैववर्त्तव्याफलकांक्षिभिः २ एकादश्यांशुक्लपक्षेयदाऋक्षंपुनर्वसुः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए० नाम्नासातुजयाख्यातातिथीनामुत्तमातिथिः ३ तामुपोष्यनरःपापान्मुच्यतेनात्रसंशयः अग्निष्टोमस्ययज्ञस्य
मा० फलंप्राप्नोतिमानवः ४ ~~मासीतोवान~~ यदातुशुक्लद्वादश्यांनक्षत्रंश्रवणंभवेत् विजयासातदाप्रोक्तातिथी
३६ नामुत्तमातिथिः ५ तस्यांस्नात्वासर्वतीर्थैस्नातोभवतिमानवः दानंसहस्रगुणितंतथावैविप्रभोजनं ६ होमः
स्तथोपवासश्चसहस्रफलदंस्मृतं तथातुशुक्लद्वादश्यांप्राजापत्यंप्रजायते ७ जयंतीनामसाप्रोक्तासर्वपाप
हरातिथिः सप्तजन्मकृतंपापंस्वल्पंवायदिवाबहु ८ तस्यांगोविंदमभ्यर्च्यलभतेवांछितंफलं यदातुशुक्लाद्वा
दश्यांपुष्यंभवतिकर्हिचित् ९ तदासासुमहापुण्याकथितापापनाशिनी योददातितिलप्रस्थंनित्यंसम्वत्सरंन
रः १० उपवासंचतस्यांयःकुरुतेनोसमोस्मृतो समरेणककुत्स्थेनधुंधुमारेणगाधिना ११ तस्यामाराधितःकृष्णो
दत्तवानखिलंभुवं वाचिकान्मानसाच्चैवकायकाच्चविशेषतः १२ सप्तजन्मकृतात्पापान्मुच्यतेनात्रसंशयः
इमामेकामुपोष्यैवपुण्यांनक्षत्रसंयुताम् १३ अश्वमेधसहस्रस्यफलंप्राप्नोतिमानवः स्नानंदानंजपोहोमःस्वा
ध्यायोदेवतार्चनम् १४ यदस्यांक्रियतेकिंचित्तत्सर्वंचाक्षयंभवेत् पुरुषैस्तुविशेषेणकर्त्तव्याफलकांक्षिभिः १५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए. फाल्गुनेत्तुविशेषेणविशेषःकथितोनृपः आमर्द्दकीव्रतंपुण्यंविष्णुलोकफलप्रदं १६ आमर्द्दकीमथोगत्वाजाग
मा. रंतत्रकारयेत् कृत्वाजागरणंरात्रौगोसहस्रफलंलभेत् १७ मांधातोवाच आमर्द्दकीकदाह्येषाउत्पन्नाद्विजसत्तम
२७ एतत्सर्वंसमाचक्ष्वपरंकौतूहलंहिमे १८ कस्मादियंपवित्रात्रकस्मात्पापप्रणाशिनी। कस्माज्जागरणंकृत्वागोस
हस्रफलंलभेत् १९ वशिष्ठउवाच कथयामिमहाभागयथेयंबहुपुण्यदा आमर्द्दकीमहावृक्षंसर्वपापप्रणाश
नं २० एकार्णवेप्रजातेनष्टेस्थावरजंगमे नष्टेदेवासुरगणेप्रणष्टेनामराक्षसे २१ तत्रदेवाधिदेवेशःपरमात्म
(सनातनः जजापब्रह्मपरममात्मनःपरमंपदं २२ ततोस्यजपतोब्रह्मामुखात्ससमप्रभः ष्ठीवनाद्बिंदुरुत्पन्नःसमू
मोविष्णुणाताह २३ तस्माद्बिंदोःसमुत्पन्नःस्त्वयंधात्रीनगोमहान् शाखाप्रशाखाबहुशःफलभारेणनामितः २४
सर्वेषामेववृक्षाणांमादिरोहःप्रकीर्तितः ब्रह्माणमसृजत्तस्मात्समंसृष्ट्वाससृजत्प्रजाः २५ देवदानवगंधर्वय
क्षराक्षसपन्नगान् असृजज्जगवान्देवोमानुषांश्चामलान् २६ आजग्मुस्तत्रदेवास्तेयत्रधात्रीहरिप्रिया
तांदृष्ट्वातेमहाभागाःपरंविस्मयमागताः २७ नजानीमइमंवृक्षंचिंतयंतोपिसंस्थिताः एवंचिंतयतांतेषांवागुवा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ चाश्रीसिरसि २८ आमर्द्दकीनमोहोषवैष्णवानांसुखोवहः अस्याःसंस्मरणादेवलभेज्ञोदानजंफलम् २९ स्पर्शना
मा॰ द्विगुणापुण्यंत्रिगुणांभक्षणात्तथा तस्मात्सर्वप्रयत्नेनसेव्याह्यामर्द्दकीसदा ३० सर्वपापहराप्रोक्तावैष्णवानांविशेष
३८ तः तस्यामूलेस्थितोविष्णुस्तदूर्द्धेनागरःस्मृतः ३१ स्कंधेचभगवान्रुद्रःसंस्थितःपरमेश्वरः शाखासुमुनयःस
र्वेप्रशाखासुचदेवताः ३२ पत्रेषुवसवोदेवाःपुष्पेषुमरुतस्तथा प्रजानांपतयःसर्वेफलेष्वेवव्यवस्थिताः ३३
सर्वदेवमयीह्येषाधात्रीवैकथितामया तस्मात्पूज्यतमाह्येषाविष्णुभक्तिपरायणैः ३४ सेवितव्याप्रयत्नेनवैष्ण
वाणांतुविशेषतः इतिश्रुत्वातुतांवाणींमहर्षयश्चातिविस्मिताः ३५ ऋषयऊचुः कोभवान्वहिजानीमःकस्मि
न्कारणात्त्वंगतः देवोवायदिवान्यःकथयस्वयथातथं ३६ वागुवाच यःकर्त्तासर्वभूतानांभुवनानांचसर्वशः
विस्मितान्विबुधान्दृष्ट्वासोहंविष्णुःसनातनः ३७ तच्छ्रुत्वादेवदेवस्यभाषितंब्राह्मणाःसुताः अनादिनिधनंदेवं
स्तोतुंसमुपचक्रमुः ३८ अंतर्भूतात्मभूतायआत्मनेपरमात्मने अच्युतायनमोनित्यंअनंतायनमोनमः ३९
दामोदरायप्रभवेयज्ञेशायनमोनमः नमोमायापटोच्छन्नजगज्जन्ममहात्मने ४० नमोदेवाधिदेवायमाध

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ वायनमोनमः एवंस्तुतस्ततस्तेभ्यस्तुतोषभगवान्हरिः ४१ प्रत्युवाचमहर्षीणामभीष्टंवेदस्वामिवः ऋषयऊचुः
मा॰ यदितुष्टोसिभगवन्नस्माकंहितकाम्यया ४२ व्रतंकिंचित्समाख्याहिस्वर्गमोक्षफलप्रदम् धनधान्यप्रदंनित्यंत्रा
३९ त्मनस्तुष्टिकारणं ४३ अल्पायासंबहुफलंव्रतानामुत्तमंव्रतम् कृतेनयेनदेवेशविष्णुलोकेमहीयते ४४ विष्णु
रुवाच फाल्गुनस्यामलेपक्षेपुष्यर्क्षेकादशीयदा भवेत्साचमहापुण्यामहापातकनाशिनी ४५ विशेषत
स्तुकर्तव्याश्रृणुध्वंद्विजसत्तमाः आमर्दकीचसंप्राप्यजागरंतत्रकारयेत् ४६ सर्वपापविनिर्मुक्तोगोसहस्रफलं
लभेत् एतद्वःकथितंविप्राव्रतानामुत्तमंव्रतम् ४७ अर्चयित्वाच्युतंतस्यांविष्णुलोकान्नविच्युतिः ऋषयऊचुः
व्रतस्यास्यविधिंब्रूहिपरिपूर्णंकथंभवेत् ४८ केमन्त्राःकेनमस्काराःकादेवाश्चप्रकीर्तिताः कथंदानंकथंस्नानं
काश्चपूजाविधिस्मृताः ४९ अर्चनस्यातुयोमंत्रःकथयस्वयथातथम् विष्णुरुवाच श्रूयतांयोविधिस्तस्यव्रतस्य
चविचक्षणाः ५० नकस्यचिन्मयाख्यातोवदाम्येतद्द्विजोत्तमाः नवम्यांनियमश्चैवदशम्यांचैवसंयमः ५१
एकादश्यांनिराहारःस्थित्वाचैवापरेहनि भोक्ष्येहंपुण्डरीकाक्षःशरणंमेभवाच्युत ५२ इतिकृत्वातुनियमंदन्त

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए० धावनपूर्वकं नालोकयेच्च पतितान्पापिष्ठांश्चाप्यधार्मिकान् ५३ दुर्वृत्तान्भिन्नमर्यादान्परदारप्रधर्षकान् अप
मा० रान्हि ततः स्नानं कारयेद्विधिवद्बुधः ५४ नद्यां तडागे कूपे वा गृहे वाहियतात्मवान् मृत्तिकालेपनं पूर्वं ततः स्नानं
४० तु कारयेत् ५५ अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ५६ मृत्तिकामंत्रः
त्वमापः सर्वयोनीनां जीवनं यक्षराक्षसाः स्वेदजोद्भिज्जजातीनां रसानां पतये नमः ५७ स्नातोहं सर्वतीर्थेषु महत्सु
न्यप्रदेषु च नद्यां चैव देवखातेषु इदं स्नानं च मे भवेत् ५८ स्नानमंत्रः जामदग्न्यं तथा चैव कारयित्वा हिरण्मयं कार्षं
कमात्तु तां चितन्द्वाद्धैनवपुनः ५९ गृहमागत्य पश्चाच्च पूजाहोमं च कारयेत् ततश्चामर्दकीं गच्छेत्सतापल्कासं
युतः ६० आमर्दकीं समीपं गत्वा परिशोध्य समंततः स्थापयेत्सजलं कुंभं चत्वरां मंत्रपूर्वकम् ६१ पंचरत्नसमोपे
तं दिव्यगंधसुवासितं छत्रोपानहवस्त्रयुतं श्रीचंदनसमर्चितम् ६२ श्रीमालालंबितग्रीवं सर्वधूपोपधूपितं दीप
मालाकुलं कुर्यात्सर्वतः सुमनोहरम् ६३ तस्योपरिन्यसेत्पात्रं दिव्यलाजाप्रपूरितं पात्रोपरिन्यसेद्देवं जामदग्न्यम
हाप्रभुम् ६४ विशोकाय नमः पादौ जानुनी विश्वरूपिणे उग्राय च ततो गुह्यं कटिं दामोदराय च ६५ उदरं पद्मना

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए० भायउरः श्रीवत्सधारिणे चक्रिणो वामके हस्ते दक्षिणे गदिने नमः ६६ वैकुण्ठाय नमः कण्ठमास्यं यज्ञमुखाय च ना
मा० सां मुखेक निधये वासुदेवाय चक्षुषी ६७ ललाटे वामनायेति सर्वसंगं प्रपूजयेत् ६८ पूजामंत्रः ततो देवाधिदे
४१ वाय अर्घं चैव प्रदापयेत् फलेन चैव शुभ्रेण भक्तियुक्तेन चेतसा ६९ नीतैर्गीतैः सवादित्रैर्धर्माख्यानवैरपि नम
स्ते देवदेवेश जामदग्न्य नमोऽस्तु ते ७० गृहाणार्घं मया दत्तं आमल्यासहितोऽधुना इत्यर्घमंत्रः ततो जागरणं कुर्याद्भ
क्तियुक्तेन चेतसा ७१ नृत्यैर्गीतैः सवादित्रैर्धर्माख्यानवैरपि वेणुवेणुश्च तथाख्यानैः क्षपयेच्छर्वरीमिमाम् ७२ प्र
दक्षिणां ततः कुर्यादामल्यां विष्णुनामभिः अष्टाधिकशतं चैव अष्टाविंशतिरेव च ७३ ततः प्रभातसमये कृत्वा नीराज
नं हरेः ब्राह्मणं पूजयित्वा तु सर्वं तस्मै निवेदयेत् ७४ जामदग्न्यघटं छत्रं वस्त्रयुग्मम् उपानहौ जामदग्न्यस्वरूपेणाग्री
यतां मम केशवः ७५ ततश्चामर्दकीं स्पृष्ट्वा कृत्वा चैव प्रदक्षिणां स्नानं कृत्वा विधानेन ब्राह्मणान्भोजयेत्ततः ७६
ततश्च स्वयमश्नीयात्कुटुंबेन समन्वितः एवं कृते तु यत्पुण्यं तत्सर्वं कथयामि ते ७७ सर्वतीर्थेषु यत्पुण्यं सर्वदानेषु
यत्फलं सर्वयज्ञाधिकं चैव लभते नात्र संशयः ७८ एतद्धः सर्वमाख्यातं व्रतानामुत्तमं व्रतम् वशिष्ठ उवाच एतावद

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ए० कादेवेशस्तत्रैवांतरधीयत ७९ तेचापिऋषयःसर्वेःचक्रुःसर्वमशेषतः श्रीकृष्णउवाच तथात्वमपिराजेंद्रकर्तुम
मा० र्हस्यशेषतः ८० व्रतमेतद्दुराधर्षंसर्वपापप्रमोचनम् इतिश्रीब्रह्माण्डपुराणेआमर्दकीजागरणंनामफाल्गुनशुक्लै
४२ कादशीमाहात्म्यंसंपूर्णम् युधिष्ठिरउवाच फाल्गुनस्यासितेपक्षेश्रुत्वाह्यामर्दकीमया चैत्रस्यकृष्णपक्षेतुकिंनामै
कादशीभवेत् १ श्रीकृष्णउवाच शृणुराजन्प्रवक्ष्यामिह्याख्यानंपापनाशनं यल्लोमशोब्रवीत्पृष्टोमांधात्राचक्रवर्ति
ना २ मांधातोवाच भगवन्श्रोतुमिच्छामिलोकानांहितकाम्यया चैत्रस्यप्रथमेपक्षेकिंनामैकादशीभवेत् ३ को
विधिःकिंफलंतस्याःकथयस्वप्रसादतः लोमशउवाच शृणुत्वंराजशार्दूलकामदांसिद्धिदायिनीं ४ कथांविचि
त्रांशुभगांपापघ्नींमोक्षदायिनीं पुराचैत्ररथोद्देशेऽप्सरोगणसेविते ५ वसंतसमयेप्राप्तेपुष्पितेविपिनेऽमले गंधा
र्वकन्यास्तत्रैवरमंत्यःसहकिन्नरैः ६ पाकशासनमुख्याश्चक्रीडंतिस्मदिवौकसः नापरंसुंदरंकिंचिद्विनाचैत्र
रथंवनं ७ तस्मिन्वनेतुमुनयस्तपंतिबहुलास्तपः सहदेवैस्तुमघवारमतेमाधवेतदा ८ एकोमुनिवरस्तत्रमेधावीना
मनामतः अप्सरातंमुनीवरंमोहनायोपचक्रमे ९ मंजुघोषेतिविख्याताभावंतस्यविचिंत्वती क्रोशमात्रेस्थितातत्

ए· स्यभपादाश्रमसंनिधौ १० गायंतिमधुरंसाधुपीडयंतिविपंचिकां गायंतींतामथालोक्यपुष्पचंदनवेष्टिताम् ११ कामो
मा· पिविजयाकांक्षीशिवभक्तान्मुनीश्वरान् तस्याःशरीरंसंविश्यपिशाचैरमनुस्मरन् १२ कृत्वाभ्रुवधनुःकोटौगुणांश्च
४३ त्वाकटाक्षकं मार्गणेनपतेक्षत्वाकामदेवोयथाक्रमं १३ कुचौकृत्वापरिकरौविजयायोपसंस्थितः मंजुघोषा
भवत्तत्रकामसेनावरूथिनी १४ मेधाविनंमुनिंदृष्ट्वासापिकामेनपीडिता यौवनोद्भिन्नदेहोसौमेधावीतिविराजते १५
सितोपवीतीसद्विजोदंडस्मराइवापरः मेधावीनिवसंस्तत्रच्यवनस्याश्रमेशुभे १६ मंजुघोषास्थितातत्रदृष्ट्वातंमुनि
पुंगवम् मदनस्यवशंप्राप्तामंदमंदमगायत १७ रणत्कलपक्षयुक्तासिंजन्नूपुरमेखला गायंतींतांतथाभूतांविलो
क्यमुनिपुंगवः १८ मदनस्यचसैन्येननीतोमोहवशंबलात् मंजुघोषासमागात्यमुनिंदृष्ट्वातथाविधं १९ हावभा
वकटाक्षैश्चमोहयामासचांगना अथसंस्थाप्यवीणांसासस्वजेतंमुनीश्वरम् २० वल्लीवाकलितावृक्षंवातवेगेन
वेपितं सोपिरेमेतयासार्द्धमेधावीमुनिपुंगवः २१ तस्मिन्नेववनोद्देशेदृष्ट्वातद्देहमुत्तमं शिवतत्त्वगतंचित्तंकामतत्त्व
वशंगतं २२ नानिशांनदिनंसोपिरममाणोतिकामुकः बुबुधेराजशार्दूलमोहितोदेवमायया २३ वहूलश्चागतः

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ कालोमुनेऽचारलोपकः मंजुघोषादेवलोकंगमनायोपचक्रमे २४ गच्छन्तीप्रत्युवाचाथरमंतंमुनिपुंगवम् आदे
मा॰ शोदीयतांब्रह्मन्स्वधामगमनाय २५ मेधाव्युवाच अद्यैवत्वंसमायाताप्रदोषादौवराप्सरे यावत्प्रभातसंध्यास्यात्ता
४४ वत्तिष्ठममांतिके २६ इतिश्रुत्वामुनेर्वाक्यंभयभीतावभूवसा पुनर्वैरमयामासतमृषिंऋषिसत्तमं २७ मुनिशापभया
द्भीतावहुलान्यारितत्सरान् वर्षाणांपंचपंचाशन्नवमासदिनत्रयं सारेमेमुनिनातत्रनिसार्द्धमिवचाभवत् सातंपु
नरुवाचाथतस्मिन्कालेगतेमुनिं २९ आदेशोदीयतांब्रह्मन्नानाव्यंस्वगृहंमया मेधाव्युवाच प्रातःकालोद्युनेवा
त्रैश्रूयतांवचनंमम ३० कुर्वेसंध्यांरतियावत्तावत्त्वंसुस्थिराभव इतिश्रुत्वामुनेर्वाक्यंभयानंदसमाकुला ३१ स्मि
तंकृत्वातुसाकिंचित्प्रत्युवाचंसुविस्मिता अप्सराउवाच कियत्प्रमाणाविप्रेंद्रतवसंध्यागतानघ ३२ मयिप्रसादंकृ
त्वातुगतःकालोविचार्यतां तस्यास्तद्वचनंश्रुत्वाविस्मयोत्फुल्ललोचनः ३३ संध्यायाहदिविप्रेंद्रःप्रमाणमकरोत
दा समानंपंचपंचाशज्जातास्तस्यातयासह ३४ चुक्रोशसतदातस्यैज्वालामालीवभूवह नेत्राभ्यांविस्फुलिंगान्समुत्
मानोतिकोपनः ३५ कालरूपांतुतांदृष्ट्वातपसःक्षयकारिणी दुःखार्जितंममतपोनीतंतदनयाक्षयं ३६ सको

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ पोष्टाम्मुनिस्तत्रशप्तुवाचाकुलेंद्रियः तांशशापाथमेधावीपैशाचित्वंभवाप्रिये ३७ धिक्त्वांपापेदुराचारेकुल
मा॰ टेपातकप्रिये तस्यशापेनदग्धासाविनपावनतास्थिता ३८ प्रसादंकुरुविप्रेंद्रशापस्यानुग्रहंकुरु सतांसंगोहि
४५ भवतिमनोभिःसप्तभिःपदैः ३९ त्वयासहममब्रह्मन्गताश्चबहुवत्सराः एतस्मात्कारणात्स्वामिन्प्रसादंकुरु
सुव्रत ४० मुनिरुवाच शृणुमेवचनंभद्रेशापानुग्रहकारकं किंकरोमित्वयापापेक्षयंनीतंमहत्तपः ४१ चै
त्रस्यकृष्णपक्षेयाभवत्येकादशीशुभा पापमोचनिकानामसर्वपापक्षयंकरी ४२ तस्याव्रतेकृतेसुभ्रुपिशाचत्वं
गमिष्यति इत्युक्त्वातांसमेधावीजगामपितुराश्रमं ४३ तमागतंसमालोक्यच्यवनःप्रत्यभाषत किमेतद्विहितं
पुत्रत्वयापुण्यक्षयःकृतः ४४ मेधाव्युवाच पापंकर्मकृतंतातरमितावाप्सरामया प्रायश्चित्तंब्रूहिमह्यंयेनपाप
क्षयोभवेत् ४५ च्यवनउवाच चैत्रस्यासितेपक्षेनाम्नावैपापमोचिनी अस्याव्रतेकृतेपुत्रपापराशिःक्षयंव्रजे
त् ४६ इतिश्रुत्वापितुर्वाक्यंकृतंतेनव्रतोत्तमम् गतंपापक्षयंतस्यपुण्ययुक्तोभवत्सः ४७ सापितंमंजुघोषाच
कृत्वेतद्व्रतमुत्तमम् पिशाचत्वाद्विनिर्मुक्तापापमोचनिकाव्रतात् ४८ दिव्यरूपधरासावैगतानाकंवराप्सरा लोमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ए॰ कृष्णउवाच पापमोचनिकाराजन्गोरहस्यफलप्रदा ४९ ब्रह्महाहेमहारीचसुरापीगुरुतल्पगः सोपिपापाद्विनि
मा॰ र्मुक्तोभवत्येवनसंशयः ५० इतिश्रीभविष्योत्तरपुराणेचैत्रकृष्णपक्षेपापमोचनिकामाहात्म्यंसमाप्तम् युधिष्ठिर
४८ उवाच वासुदेवनमस्तुभ्यंकथयस्वममाग्रतः चैत्रस्यशुक्लपक्षेतुकिन्नामैकादशीभवेत् १ श्रीकृष्णउवाच शृणु
ष्वेकमनाराजन्कथांमेतांपुरातनीं वशिष्ठेनामकथयत्प्राग्दिलीपायपृच्छते २ दिलीपउवाच भगवंछ्रोतुमिच्छामि
कथयस्वप्रसादतः चैत्रस्यशुक्लपक्षेतुकिन्नामैकादशीभवेत् ३ वशिष्ठउवाच चैत्रस्यशुक्लपक्षेतुकामदानामनाम
तः एकादशीपुण्यतमापापेंधनदवानला ४ शृणुराजन्कथामेतांपापघ्नींपुण्यदायिनीं पुरानागपुरेरम्येहेमरत्न
विभूषिते ५ पुरेतस्मिन्पुंडरीकोराजाराज्यंचकारह पुंडरीकमुखानागानिवसंतिमदोत्कटाः ६ गंधर्वैःकि
न्नरैश्चैवअप्सरोभिस्ससेविते तत्राप्सराललितागंधर्वोललितस्तथा ७ उभौरागेणसंसक्तौदंपतीकामपीडितौ
रेमातेस्वगृहेरम्येधनधान्ययुतौतथा ८ ललितायाश्चहृदयेगंधर्वोवसतेसदा हृदयेतस्यललिता नित्यंवसतिभामि
नी ९ एकदापुंडरीकाद्याः क्रीडंतिसदसिस्थिताः गीतगानंप्रकुरुतेललितोदयितांविना १० पदबंधस्खल।

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ द्विग्नोबभूवललितास्मरन् मनोभावंविदित्वास्यकर्कोटनागसत्तमः ११ पद्मबंधच्युतंतस्यपुंडरीकेनवेदयत् श्रुत्वा।
मा॰ कर्कोटकवचःपुंडरीकोभुजंगराट् १२ क्रोधसंरक्तनयनोबभूवातिभयंकरः शशापललितंतत्रगायंतंमदनातुरम्
४७ १३ राक्षसोभवदुर्बुद्धेक्रव्यादःपुरुषादकः यतःपत्नीवशीपातोगायमानोपमाग्रतः १४ वचनात्तस्यराजेंद्रराक्षसो
बभूवह रौद्राननोविरूपाक्षोदृष्टरूपोभयंकरः १५ बाहूयोजनविस्तीर्णौमुखं कंदरसन्निभम् चन्द्रसूर्यनिभे
नेत्रेग्रीवापर्वतसन्निभा १६ नासारंध्रेतुविवरेअधरौयोजनार्धकौ शरीरंतस्यराजेन्द्रउच्छ्रितंयोजनाष्टकम् १७
ईदृशोराक्षसःसोभूद्भुंजानःकर्मणःफलम् ललितातमथालोक्यस्वपतिंविकृताकृतिं १८ चिंतयामासमनसा
दुःखेनमहतार्दिता किंकरोमिक्वगच्छामिपतिःपापेनपीडितः १९ इतिसंचिंत्यमनसानशर्मलभतेतुसा चचार
पतिनासार्द्धंललितागहनेवने २० बभ्रामविपिनेदुर्गेकामरूपःसराक्षसः निर्घृणःपापनिरतोविरूपःपुरुषाद
कः २१ नसुखंलभतेरात्रौनदिवापापपीडितः ललितादुःखितातीवपतिंदृष्ट्वातथाविधम् २२ भ्रमंतीतेनसा
र्द्धंसाक्रंदंतीगहनेवने कदाचिद्विंध्यशिखरेचरंतीबहुकौतुके २३ ऋष्यशृंगाश्रमेतत्रदृष्ट्वाश्रमपदंशुभम् शीघ्रं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए० आगमल्ललिता विनयावनता सती २४ तामुवाच मुनिर्दृष्ट्वा कात्वं कस्य सुता शुभे किमर्थमिह वा याता सत्यं ब्रूहि ममा
मा० ग्रतः २५ ललितोवाच वीरधन्वेति गंधर्वः सुतातस्य महात्मनः ललिता नाम मां विद्धि गत्यर्थमिह चागता भर्ता
४८ मे शापदोषेण राक्षसोभूत् महामुने रौद्ररूपं दुराचारं तं दृष्ट्वा नास्ति मे सुखं २७ सांप्रतं नाथ मां ब्रह्मन् प्रायश्चित्तं वदप्र
भो येन पुण्येन विप्रेंद्र राक्षसत्वाद्विमुच्यते २८ ऋषिरुवाच चैत्रमासस्य रंभोरु शुक्लपक्षोस्ति सांप्रतं कामदै
कादशी नाम्ना तिथ्य ललितापि मा २९ कुरुष्व तद्व्रतं भद्रे विधिपूर्वं मयोदितं तस्या व्रतस्य यत्पुण्यं तत्त्वं भर्त्रे प्रदी
यताम् ३० दत्ते पुण्ये च यत्तस्य शापदोषो विनश्यति इति श्रुत्वा मुनेर्वाक्यं ललिता हर्षिताभवत् ३१ उपोष्यैकादशीं
राजन्द्वादश्यां द्विजसन्निधौ विप्रस्यैव समीपे तु वासुदेवस्य चाग्रतः ३२ वाक्यमूचे तु ललिता स्वपत्युस्तारणाय वै मया
तु यद्व्रतं चीर्णं कामदाया उपोषणात् ३३ तस्य पुण्यप्रभावेन गच्छत्वस्य पिशाचता ललिताकथनादेव वर्तमाने तु
तत्क्षणे ३४ गतपापः स ललितो दिव्यदेहो बभूव ह राक्षसत्वं गतं तस्य प्राप्ता गंधर्वता पुनः ३५ हेमरत्नसमाकी
र्णैरम्य ललितया सह तौ विमानसमारूढौ पूर्वतो रूपाधिकावुभौ ३६ दंपती अतिशोभाढ्यौ कामदायाः प्रभावतः इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ए० ज्ञात्वा नृपश्रेष्ठ कर्त्तव्यैषा प्रयत्नतः ३७ लोकानां च हितार्थाय तवाग्रे कथिता मया ब्रह्महत्यादिपापघ्नी पिशाचत्वं
मा० विनाशिनी ३८ नातः परतरा काचित्त्रैलोक्ये सचराचरे पठनाच्छ्रवणाद्राजन्वाजिपेयफलं लभेत् ३९ इति श्रीवा
४९ राहपुराणे चैत्रकृष्णपापमोचन्येकादशीमाहात्म्यं समाप्तम् युधिष्ठिर उवाच वैशाखस्यासिते पक्षे किन्नामैकादशी
भवेत् ब्रूहि तस्याश्च माहात्म्यं वासुदेव नमोस्तु ते १ श्रीकृष्ण उवाच सौभाग्यदायिनी राजन्निह लोके परत्र च वै
शाखकृष्णपक्षे तु नाम्ना चैव वरूथिनी २ वरूथिन्या व्रतेनैव सौख्यं भवति सर्वदा पापहानिश्च भवति सौभा
ग्यप्राप्तिरेव च ३ दुर्भगा या करोत्येनां सा स्त्री सौभाग्यमवाप्नुयात् लोकानां चैव सर्वेषां भुक्तिमुक्तिप्रदायिनी ४
सर्वपापहरा नृणां गर्भवासनिकृन्तनी वरूथिन्या व्रतेनैव मांधाता स्वर्गतिं गतः ५ धुंधुमारादयश्चान्ये राजानो
वहवस्तथा ब्रह्मकपालनिर्मुक्तो बभूव भगवान्भवः ६ दशवर्षसहस्राणि तपस्तप्यति यो नरः तत्तुल्यं फलमा
प्नोति वरूथिन्याव्रतान्नरः ७ अज्ञावान्यस्तु कुरुते वरूथिन्याव्रतं नरः वांछितं लभते सोपि इह लोके परत्र
च ८ पवित्रा पावनी ह्येषा महापातकनाशिनी भुक्तिमुक्तिप्रदा चैव कर्तॄणां नृपसत्तम ९ अश्वदानान्नृ

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए० पश्वश्रेष्ठगजदानंविशिष्यते गजदानाद्भूमिदानंस्वर्णदानंततोधिकम् ९ ततःसुवर्णदानाद्धितिलदानंविशिष्य
मा० ते तिलदानादन्नदानंतस्मादपिविशिष्यते ११ अन्नदानात्परंदानंनभूतोनभविष्यति पितृदेवमनुष्याणां
५० तृप्तिरन्नेनजायते तत्समंकविभिःप्रोक्तंकन्यादानंनृपोत्तम् धेनुदानंचतत्तुल्यमित्याहभगवान्स्वयम् १३
प्रोक्तेभ्यःसर्वदानेभ्योविद्यादानंविशिष्यते तत्फलंसमवाप्नोतिनरःकृत्वावरूथिनी १४ कन्याभवित्तेनजीवंतिये
नराःपापमोहिताः क्षीणेपुण्येपाप्मगच्छंतिनिरयंपातनमायुतम् १५ तस्मात्सर्वप्रयत्नेनग्राह्यंकन्याकाधनम् कन्यां
पुण्येनयोदद्याद्यथाशक्तिस्वलंकृतां १६ तत्पुण्यसंख्यांनृपतेचित्रगुप्तोनवेत्फलम् तत्तुल्यफलमाप्नोतिनरःकृत्वा
वरूथिनीं १७ कांस्यंमांसंमसूरान्नंचणकान्कोद्रवांस्तथा शाकंमधुपरान्नंचपुनर्भोजनमैथुनम् १८ पराप
वादंपैशुन्यंस्तेयंहिंसांतथारतिम् क्रोधाद्यंनृतवाक्यंचएकादश्यांविवर्जयेत् १९ कांस्यंमांसंमसूरंक्षौद्रंतैलंवितथ
भाषणं व्यायामंचप्रवासंचपुनर्भोजनमैथुनम् २० सुरापानंतथाक्षौद्रंद्वादश्यांपरिवर्जयेत् अनेनविधिनाराजन्
न्विहितावैर्वरूथिनी २१ रात्रौजागरणंकृत्वापूजितोमधुसूदनः सर्वपापविनिर्मुक्तास्तेयांतिपरमांगतिं २२ त

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ स्मात्सर्वप्रयत्नेनकर्तव्यापापभीरुभिः क्षयारितनयाज्जीवैवद्विवतत्पयिनी २३ पठनाच्छ्रवणाद्राजन्गोसहस्र

मा॰ फलंलभेत् सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते २४ इतिश्रीभविष्योत्तरपुराणेवैशाखकृष्णवरूथिन्येका

५१ दशीमाहात्म्यंसमाप्तम् अर्जुनउवाच वैशाखेशुक्लपक्षेतुकिंनामैकादशीभवेत् किंफलंकोविधिस्तस्याएतद्वि

स्तरोवद १ श्रीकृष्णउवाच वशिष्ठेनपुराप्रोक्तारामायचमहात्मने तदहंसंप्रवक्ष्यामिनराणांहितकाम्यया २

श्रीरामोवाच भगवन्श्रोतुमिच्छामिव्रतानामुत्तमंव्रतं सर्वपापक्षयकरंसर्वदुःखविनिकृन्तनं ३ मयादुःखानि

भुक्तानिसीताविरहजानितु ततोहंभयभीतोस्मिपृच्छामित्वांमहामुने ४ वशिष्ठउवाच साधुपृष्टंत्वयारामतवैषानै

ष्ठिकीमतिः त्वन्नामग्रहणेनैवपूज्योभवतिमानवः ५ तथापिकथयिष्यामिलोकानांहितकाम्यया पवित्रं

पावितानांचव्रतानामुत्तमंव्रतम् ६ वैशाखस्यसितेपक्षेयावैत्वेकादशीभवेत् मोहिनीनामसाप्रोक्तासर्वपाप

हरापरा ७ मोहजालात्प्रमुच्यंतेपातकानांसमूहतः अस्याव्रतप्रभावेनसत्यंसत्यंवदाम्यहम् ८ अतःका

रणाद्रामकर्तव्यैषाभवादृशैः पातकानांक्षयकरीमहादुःखविनाशिनी ९ श्रृणुष्वैकमनारामकथांपाप

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए० हाम्पराम् यस्याश्रवणमात्रेणमहापापम्प्रणश्यति १० सरस्वत्यास्तटेरम्येपुरीभद्रावतीशुभा द्युतिमान्नाम
मा० नृपतिस्तत्रराज्यंकरोतिवै ११ सोमवंशोद्भवोराजन्धृतिमान्सत्यपराक्रमः तत्रैववैश्योनिवसतिधनधान्यसमृद्धि
५२ मान् १२ धनपालइतिख्यातःपुण्यकर्मप्रवर्तकः दानसत्रप्रपानांचतडागारामकारकः १३ विष्णुभक्ति
रतस्तस्यसंजातास्सतंचपुत्रकाः सुमनाद्युतिमांश्चैवमेधावीसुकृतीतथा १४ पंचमोधृष्टबुद्धिश्चमहापा
परतःसदा परस्त्रीसंगनिरतोविटगोष्ठीविशारदः १५ द्यूतेदिव्यरतासक्तःपरस्त्रीरतिलालसः नदेवानर्च
तिकुधीर्नपितॄन्नद्विजानपि १६ अन्यायवर्तीदुष्टात्मापितुर्द्रव्यक्षयंकरः अभक्ष्यभक्षकश्चैवसुरापान
रतःसदा १७ वेश्याकण्ठेक्षिप्तबाहुःगच्छतिस्मचतुष्पथे पित्रानिःकाशितोगेहात्परित्यक्तश्चबांधवैः १८
स्वदेहभूषणान्येवक्षयंनीतानितेनवै गणिकाभिःपरित्यक्तोनिंदितश्चधनक्षयात् १९ ततश्चिंतापरोजा
तोवस्त्रहीनःक्षुधार्दितः किंकरोमिक्वगच्छामिकेनोपायेनजीव्यते २० तस्करत्वंसमारब्धंतस्मिन्नेवपुरेपुनः
गृहीतोराजपुरुषैर्मुक्तश्चपितृगौरवात् २१ पुनर्बद्धःपुनर्मुक्तःपुनर्बद्धःससंभ्रमात् धृष्टबुद्धिर्दुराचारीनिबद्धो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ निगडैर्दृढैः २२ कशाघातैस्ताडितश्चपीडितश्चपुनःपुनः एवमुक्तस्ततोराजामोचितोदृढबंधनात् २३ नस्था
मा॰ तव्यंमदेशेस्मिंस्त्वयापापात्मनाकथंचन निर्जगामभयात्तस्यततोसौगहनंवनं २४ क्षुत्तृष्णापीडितोराजन्नितश्चेतश्च
५३ धावतः सिंहवन्निर्जघानासौमृगांश्चकरतित्तिरान् २५ आमिषाहारनिरतोवनेतिष्ठतिसर्वदा कोसरासनंकृत्वा
निषंगंपृष्ठसंयुतं २६ आरण्यचारीसोहंतिपक्षिणश्चचतुष्पदान् चकोरांश्चमयूरांश्चकंकतित्तिरमूषकान् २
७ एतानन्यान्हंतिनित्यंधृष्टबुद्धिर्नियतोधृणः पूर्वजन्मकृतैःपापैर्निमग्नःपापकर्दमे २८ दुःखशोकसमाविष्टो
चिंतयंश्चापाहर्निशं कौडिन्यस्याश्रमंप्राप्तःपुण्ययोगात्कचित् २९ माधवेमासिजान्हव्यांकृतस्नानंतपोध
नं सदृदर्शधृष्टबुद्धिःविषिंहस्नातथैवच ३० तद्वस्त्रबिंदुस्पर्शेनगतपापोहतास्त्रुभः कौडिन्यस्याग्रतःस्थित्वा
प्रत्युवाचकृतांजलिः ३१ धृष्टबुद्धिरुवाच केनोपायेनब्रह्मन्पापादस्मान्निःकृतिः तदहंश्रोतुमिच्छामियथा
तद्वनुपूर्वशः ३२ कौडिन्यउवाच शृणुष्वैकमनाभूत्वायेनपापक्षयस्तव वैशाखस्यसितपक्षेमोहिनीनामवि
श्रुता ३३ एकादशीव्रतंतस्याःकुरुमद्वाक्यनोदितः मेरुतुल्यानिपापानिक्षयंनयतिदेहिनां ३४ बहुजन्म

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

जितान्येषामोहिनीसमुपोषिता इतिवाक्यंमुनेःश्रुत्वाविधिंदृष्ट्वातथैवच ३५ व्रतंचकारविधिवत्कौडिन्यस्यो
पदेशतः व्रतेकृतेनृपश्रेष्ठगतपापोबभूवसः ३६ दिव्यदेहस्ततोभूत्वागरुडोपरिसंस्थितः जगामवैष्ण
वंलोकंसर्वोपद्रववर्जितम् ३७ एतादृशंरामचंद्रउत्तमंमोहिनीव्रतं नातःपरतरंकिंचित्त्रैलोक्येसचराचरे
३८ यज्ञादितीर्थदानानिकलांनार्हंतिषोडशीं पठनाच्छ्रवणाद्राजन्गोसहस्रफलंलभेत् ३९ इतिश्रीकू
र्मपुराणेवैशाखशुक्लैकादश्यांमोहिनीमाहात्म्यंसंपूर्णम् युधिष्ठिरउवाच ज्येष्ठस्यकृष्णपक्षेतुकिंनामैकादशीभवेत्
त् श्रोतुमिच्छामिमाहात्म्यंतद्वदस्वजनार्दन १ श्रीकृष्णउवाच साधुपृष्टंत्वयाराजंल्लोकानांहितकाम्यया
बहुपुण्यप्रदाह्येषामहापातकहारिणी २ अपरानामराजेंद्रअक्षताफलदायिनी लोकेप्रसिद्धतांयातिअ
परांयस्तुसेवते ३ ब्रह्महत्याभिभूतोपिगोत्रहाभ्रूणहातथा परापवादवादीचपरस्त्रीरसिकोपिच ४ अ
परासेवनाद्राजन्विपाप्माभवतिध्रुवं कूटसाक्ष्यंवदेद्यस्तुतुलाकूटंकरोतियः ५ कूटवेदंपठेद्विप्रःकूटशास्त्रं
तथैवच ज्योतिषीकूटगणकःकूटायुर्वेदवान्भिषक् ६ कूटसंगःपुमान्नेतेविज्ञेयानरकौकसः अपरासेव

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ नाद्राजन्पापयुक्ताभवंतिते ७ ब्राह्मणाब्रह्मविद्यांयेनपठंतिनरर्षभ तेयांतिनरकंघोरंयावच्चंद्रदिवाकरौ ८
मा॰ तेषांशास्त्रविहीनानांनिष्कृतिर्नास्तिभारत क्षत्रीयास्त्यक्तयुद्धायेपलायनपरान्तप ९ तेयांतिनरकंघोरंपुन
५५ र्निष्कृतिर्दुर्लभं एतेचान्येचबहवोमहापातकिनोनराः १० अपरायाव्रतंकृत्वापूजयित्वात्रिविक्रमं सर्वपा
पविनिर्मुक्ताविष्णुलोकंव्रजंतिते ११ अत्रैवोदाहरंतीममितिहासंपुरातनं देवलस्यचसंवादंपतितस्यद्विजा
स्यच १२ जातिभ्रष्टोद्विजःकश्चित्परित्यक्तःस्वबांधवैः क्षुत्क्षामोदीनवदनोरोगैश्चपरिपीडितः १३ आध्या
त्मिकेनतापेननित्यमेवतिरस्कृतः नैकत्रवाससमापन्नःप्रवासेनातिदुःखितः १४ पर्यटन्वनमध्यस्थोभुं
जानःकर्मणःफलम् देवलंमुनिशार्दूलंतपसांतंज्वलत्प्रभं १५ उपसंगम्यविप्रोसौदंडवत्प्रणनामतं महा
पातकतप्तांगोवेपमानःस्वकर्मणा १६ दयालुंमुनिशार्दूलंइदंवचनमब्रवीत् पापोहंपापकर्माहंमहादुः
खेनपीडितः १७ कृपयामुनिशार्दूलमामुद्धर्तुमिहार्हसि इतितस्यवचःश्रुत्वादेवलःकरुणाशयः १८ तं
वीक्ष्यकृपयापापंदयार्द्रेणस्वचक्षुषा दुःखप्रशमयन्स्तस्यमेघगंभीरयागिरा १९ माभैषीर्विप्रभद्रंतेनिष्पाप

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पु. स्त्वंभविष्यसि विष्णोराराधनंपुंसांविशोकायप्रकल्पते २० अनाराधितगोविंदास्तस्माद्दुःखभागिनः
अ. निष्कल्मषाभवंत्येवअपरायामुपोषणात् २१ आगतानिकटेमासुएतस्मात्वंचमेहनि तस्यानुष्ठानमात्रेणदुःख
५६ मुक्तोभविष्यति २२ यावन्नायातिमासपरस्यातिथौनामसुत्तमातिथिः तावत्तिष्ठाश्रमास्मासेमदीयेद्विजसत्तम
म २३ उत्थानन्नामधेयानिहरेरद्भुतकर्मणः शृणुतस्यकथापुण्याःमुनिभिःवर्णिताःमुहुः २४ श्रवणा
त्कीर्तनाद्विष्णुः सद्यस्तुष्यतिनान्यथा इतितस्यवचःश्रुत्वासद्विजस्तुष्टमानसः २५ गोविंदंक्षलनामेति
प्रजयंस्तत्रसंस्थितः शृण्वन्भद्राणिकालस्यकीर्त्तितानिमुनिभिर्मुहुः एवंनिनायतत्रैवपंचाहानिनराधिपः
एकादश्याद्दिनेप्राप्तेनिराहारोजितेंद्रियः २७ तत्रत्यैर्मुनिभिःसाकंकृतवान्व्रतमुत्तम रात्रौजागरणंकृत
पूजयित्वात्रिविक्रमं २८ वन्योपचारैःराजेंद्रप्रभातेतुष्टमानसः दिव्यदेहधरोभूत्वाविमानेवार्कवर्चसा
२९ नीयमानस्सुनंदाद्यैराकरोहहरेःपदं ततःसमुनयःसर्वेजयशब्दैर्मुहुर्मुहुः ३० तुष्टुवुर्द्विजशार्दूलधन्यो
यंब्राह्मणोयतः आराध्यविष्णुंतल्लोकंगतोदिव्योभितुष्टतः ३१ एतस्मात्कारणाद्राजन्कार्त्तिकेषाम्रयत्नतः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ए० पठनाच्छ्रवणाद्राजनसर्वपापैःप्रमुच्यते ३२ लोकानांचहितार्थायतवाग्रेकथितंमया त्वंतुमुक्तोसिराजेंद्रयत
मा० त्तेमुनिरीदृशी इतिश्रीब्रह्मांडपुराणेज्येष्टकृष्णैकादशीअपरामाहात्म्यंसंपूर्णम् भीमसेनउवाच पिता
५७ मह महाबुद्धेशृणुमेपरमंवचः युधिष्ठिरश्चकुंतीचतथाद्रुपदनंदिनी १ अर्जुनोनकुलश्चैवसहदेवस्तथैव
च एकादश्यांनभोक्तव्यंकदाचिदपिसुव्रत २ त्वयंतेनवभुंजं तिपक्षयोरुभयोरपि तेमांब्रुवंतिवैनित्यंमा
भुंक्ष्वत्वंवृकोदर ३ अहंतानब्रवंस्तातबुभुक्षादुःसहाममं दानंदास्यामिविधिवत्पूजयिष्यामिकेशवम्
४ भीमसेनवचःश्रुत्वाव्यासोवचनमब्रवीत् व्यासउवाच यदिस्वर्गमभीष्टंतेनरकंदुष्टमेवच ५ एकादश्यां
नभोक्तव्यंपक्षयोरुभयोरपि भीमसेनउवाच पितामहमहाबुद्धे कथयामितवाग्रतः ६ एकभक्तेनशा
क्तोहमुपवासंकथंप्रभो वृकोपिनामयोवन्हिःसदाजठरेमम ७ अतिवेलंपदाश्नामितदासमुपशाम्यति
एवंकर्तुमशक्तोहमुपवासंमहामुने ८ येनवैप्राप्यतेस्वर्गस्तन्कर्त्तास्मिनसंशयः तदेववदनिश्चित्ययेनश्रेयो
हमाप्नुयात् ९ व्यासउवाच वृषस्थेमिथुनस्थेवायदाचैकादशीभवेत् ज्येष्टमासिसितेपक्षेसापोष्योदकाव

र्जिता १० तत्राचमनवाह्यं च वर्जयित्वोदकं बुधः उपभुंजीत नैवेह व्रतभंगोन्यथा भवेत् ११ उदयादुदयं यावद्व
र्जयित्वोदकं ततः अयत्नात्समवाप्नोति द्वादशद्वादशीफलम् १२ ततः प्रभाते विमले द्वादश्यां स्नानमाचरे
त् जलं सुवर्णं दत्वा तु द्विजातिभ्यो यथाविधिः १३ भुंजीत कृतकृत्यस्तु ब्राह्मणैः सहितो वशी एवं कृते तु य
त्पुण्यं भीमसेन शृणुष्व तत् १४ संवत्सरे तु याश्चैव एकादश्यो भवंति हि तासां फलमवाप्नोति अत्र मे नास्ति
संशयः १५ इति मां केशवः प्राह शंखचक्रगदाधरः सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज १६ एकादश्यां
निराहारः स तु पापात्प्रमुच्यते द्रव्यशुद्धिः कलौ नास्ति संस्कारः कर्म एव च १७ वैदिकश्च कुतश्चास्ति प्राप्ते
दुष्टकलौ युगे किं तु ते बहुनोक्तेन वायुपुत्र पुनः पुनः १८ एकादश्यां न भुंजीत पक्षयोरुभयोरपि एकादश्यां
सितपक्षे ज्येष्ठे मासि उदकं विना १९ एतस्य फलमाप्नोति यच्छृणुष्व वृकोदरः सर्वतीर्थेषु यत्पुण्यं सर्वदाने
षु यत्फलं २० तत्फलं समवाप्नोति इमां कृत्वा वृकोदरः उपोषितास्त्वया सर्वाः स्युरेकादश्यो न संशयः २१
धनधान्यवहा पुण्या पुत्रारोग्यसुखप्रदा उपोषिता नरव्याघ्र इति सत्यं ब्रवीमि ते २२ यमदूता महाकायाः करा

ए० लाःकालरूपिणः दंडपाशधरारौद्रानोपसर्पंतितंनरम् २३ पीतांबरधराःसौम्याःस्रक्चक्रहस्तामनोरमाः अंतकाले
मा० नयंतिवैष्णवं पुरीम् २४ तस्मात्सर्वप्रयत्नेनसोपोष्याद्दशकवर्जिता जलधेनुंततोदत्वासर्वपापैःप्रमुच्यते २५
५९ इतिश्रुत्वातदाचक्रःपांडुराजजनमेजयः तथात्वमपिभूपालउपवासंविधेहिभोः २६ कुरुष्वसर्वप्रयत्नेनसर्वपाप
प्रशांतये एकादश्यांनिराहारोनियतोद्वादशीदिने २७ भोक्ष्येहंपुंडरीकाक्षशरणंमेभवाच्युत इत्युच्चा
र्यततोमंत्रमुपवासपरोभवेत् २८ सर्वपापविनाशायश्रद्धादमसमन्वितः मेरुमंदरमात्रंतुत्रियोवापुरुषस्य
वा २९ सर्वंतद्भस्मतांयातिएकादश्याःप्रभावतः नशक्नुवंतियेदातुंजलधेनुंनराधिप ३० सकांचनःप्रद
तव्योघटकोवस्त्रसंयुतः तोयस्यनियमंयस्यामेकादश्यांप्रयत्नतः ३१ कुर्वंतिपुण्यभाजस्तेनात्रकार्याविचा
चारणा फलंकोटिसुवर्णस्ययामेयामेसुभप्रदं ३२ स्नानंदानंजपोहोमःयदस्यांक्रियतेनरैः उपोष्यतेस
विधिवद्भवत्तत्पदमाप्नुयात् ३३ सुवर्णमन्नंवासोवायदस्यांसंप्रदीयते स्वल्पंवापिकरुश्रेष्ठतदप्यक्षयतांव्रजे
त् ३४ एकादशीदिनेयोन्नंभुंक्तेपापांसमंभुंजति इहलोकेसचांडालोमृतःप्राप्नोतिदुर्गतिं ३५ ये दास्यंतिदा

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ नानिद्वादश्यांसमुपोषिताः ज्येष्ठेमासिसितेपक्षेप्राप्स्यंतिपरमंपदम् ३६ ब्रह्महामद्यपस्तेयीगुरुद्वेष्टासदानृतो
मा॰ मुच्यतेपातकैःसर्वैःद्वादशीयैस्तुपोषिता ३७ विशेषंशृणुकौंतेयनिर्जलैकादशीदिने यत्कर्त्तव्यंनरैःस्त्रीभिः
६२ श्रद्धादमसमन्वितैः ३८ जलशायीतुसंपूज्योदेयाधेनुश्चतन्मयी प्रत्यक्षावात्रपस्येष्ट घृतधेनुस्थापिता ३९
दक्षिणाभिस्सुपुष्टाभिर्मिष्टान्नैश्चपृथग्विधैः तोषणीयःप्रयत्नेनद्विजोधर्मभृतांवरः ४० तुष्टोभवतितेनेक्षिप्र
तैस्तुष्टैर्माधवोहरिः आत्मद्रोहःकृतस्तेहिर्यैरेषानह्युपोषिता ४१ पापात्मनोदुराचारादुष्टास्तेनात्रसंशयः कु
लानांशतमागामिकुलैर्नीतंतथाशतं ४२ आत्मनासहतैर्नीतंवासुदेवस्यमंदिरं शांतैर्दांतैर्दानपरैश्च द्विज
तथाहरिं ४३ कुर्वद्भिर्जागरंरात्रौयैरेषासमुपोषिता अन्नंपानंतथागावोवस्त्रयुग्मंतथाशुभं ४४ कमंडलुंत
थाछत्रंदातव्यंनिर्जलादिने उपानहौयोददातिपात्रभूतद्विजन्मने ४५ सुसौवर्णेनयानेनस्वर्गलोकेमहीय
ते यश्चमांशृणुयाद्भक्त्यायश्चापिपरिकीर्तयेत् ४६ उभौतौस्वर्गमायातौनात्रकार्याविचारणा यत्फलंसंनि
हत्यायंराहुग्रस्तेदिवाकरे कृत्वाश्राद्धंलभेन्मर्त्यस्तदस्याश्रवणादपि नियमश्चप्रकर्त्तव्योदंतधावनपूर्वकं ४७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ एकादश्यांनिराहारोवर्जयिष्यामिवैजलं केशवप्रीणनार्थायअन्यदाचमनादृते ४९ द्वादश्यांदेवदेवेशःपूजनी
मा॰ यःप्रयत्नतः गंधपुष्पैस्तथादीपैर्वासोभिःप्रियदर्शनैः ५० पूजयित्वाविधानेनमंत्रमेतदुदीरयेत् देवदेव
६१ हृषीकेशसंसारार्णवतारक ५१ उदकुंभप्रदानेननयमांपरमांगतिम् ततःकुंभाःप्रदातव्याब्राह्मणेभ्यश्चशक्ति
तः ५२ सान्नवस्त्रयुताभीमसछत्रोपानद्युताऽल्प दानानिचात्रदेयानिजलधेनुविशेषतः ५३ भोजयित्वाततो
विप्रान्स्वयंभुंजीतवाग्यतः एवंयःकुरुतेपूर्णांद्वादशींपापनाशिनीं ५४ सर्वपापविनिर्मुक्तोपदंगच्छत्यनामयं
ततःप्रभृतिभीमेनकृताह्येकादशीशुभा ५५ पांडवैकादशीनाम्नालोकेख्याताबभूवसा इतिश्रीब्रह्मवैवर्तेम
हापुराणेज्येष्ठशुक्लैकादशीनिर्जलामाहात्म्यंसंपूर्णम् युधिष्ठिरउवाच ज्येष्ठशुक्लेनिर्जलायातंमाहात्म्यंश्रु
तंमया आषाढकृष्णपक्षेतुकिंनामैकादशीभवेत् १ कथयस्वप्रसादेनममाग्रेमधुसूदन श्रीकृष्णउवाच व्रता
नामुत्तमंराजन्कथयामितवाग्रतः २ सर्वपापक्षयकरंभुक्तिमुक्तिप्रदायकं आषाढस्यासितेपक्षेयोगिनीनाम
नामतः ३ एकादशीनृपश्रेष्ठमहापातकनाशिनी जगत्त्रयेसारभूतायोगिनांव्रतकारिणां ४ कथयामितवाग्रे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ हेंकथांपौराणिकींशुभां अलकायांराजराजः शिवभक्तिपरायणः ५ तस्यासीत्पुष्पबटुकोहेममालीतिनाम।
मा॰ तः तस्यपत्नीसुरूपाचविशालाक्षीतिनामतः ६ सतस्याःस्नेहसंयुक्तःकामपाशवशंगतः मनसाप्रतियु
६२ क्तेनतामानीयगृहेस्थितः ७ पत्नीप्रेमसमायुक्तोनकुबेरालयंगतः हेममालीस्वभवनेरमतेकांतयासह ८
यक्षराट्प्रत्युवाचाथकालातिक्रमकोपितः कस्मान्नायातिभोयक्षाहेममालीदुरात्मवान् ९ निश्चयःक्रि
यतामस्यइत्युवाचपुनःपुनः यक्षाऊचुः वनिताकामुकोगेहेरमतेस्वेच्छयानृप १० तेषांवाक्यंसमाकर्ण्यकु
बेरःकोपपूरितः आह्वयामाससुतरांस्त्रीजितंहेममालिनं ११ ज्ञात्वाकालात्ययंसोपिभयव्याकुललोचनः
अस्नातएवआगात्सकुबेरस्याग्रतःस्थितः तंदृष्ट्वाधनदःक्रुद्धःतस्मैसंरक्तलोचनः प्रत्युवाचरुषाविष्टःकोप(
विस्फुरिताधरः १३ धनदउवाच आःपापदुष्टदुर्बुद्धेकृतवान्देवहेलनं निरंकुशःस्त्वयंगेहेप्रयुक्तःकांतयास
ह १४ अस्मात्स्थानाद्दुराचाराश्वस्थानमथाधम इत्युक्तेवचनेतेनतस्मात्स्थानात्पपातह १५ महादुःखा
भिभूतस्तुकुष्ठैःपीडितविग्रहः नैवतोयंनभक्ष्यंचवनेरौद्रेलभत्यसौ १६ नसुखंदिवसेतस्यननिद्रांलभतेनिशि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ए० छायायांपीडिततनुर्निदाघेत्वंतपीडितः १७ शिवपूजाप्रभावेनस्मृतिस्तस्यनलुप्यते पातकेनाभिभूतोपिपू
मा० र्वकर्मस्मरत्यसौ १८ भ्रममाणस्ततोगच्छन्हेमाद्रिंपर्वतोत्तमम् तत्रापश्यन्मुनिवरंमार्कंडेयंतपोनिधिं १९ य
६३ स्यायुर्वर्ततेराजन्ब्रह्मणोदिवसाष्टकं आश्रमंसगतस्तस्यऋषेर्ब्रह्मसदःसमं २० ववंदेचरणौतस्यदूरतःपाप
कर्मकृत् मार्कंडेयोमुनिवरोदृष्ट्वातंकुष्ठिनंतदा २१ परोपकारणार्थायसमाहूयेदमब्रवीत् मार्कंडेयउवा
च कस्मात्कुष्ठाभिभूतस्त्वंकस्मान्निंद्यतरोभवान् २२ इत्युक्तःसंप्रत्युवाचमार्कंडेयंमहामुनिं हेममाल्युवा
च राजराजस्यानुचरोहेममालीतिनामतः २३ मानसात्पद्मनिचयःमानीयप्रत्यहंमुने शिवपूजनवेलायांकु
बेरायसमर्पयम् २४ एकस्मिन्दिवसेकाललोपश्चविहितोमया पत्नीसौख्यप्रसक्तेनकामव्याकुलचेतसा २५
ततःक्रुद्धेनशप्तोस्मिराजराजेनवैमुने कुष्ठाभिभूतःसंतापोवियुक्तःकांतयातदा २६ अधुनातवसान्निध्यंप्राप्तो
स्मिशुभकर्मणा सतांस्वभावतश्चित्तंपरोपकारणक्षमम् २७ इतिज्ञात्वामुनिश्रेष्ठमांप्रशाधिकृतागसं मार्कंडे
यउवाच त्वयासत्यमिहप्रोक्तंनासत्यंभाषितंतव २८ अतोव्रतोपदेशेनकथयामिशुभप्रदं आषाढेकृष्णप

ए० ष्ठोत्वंयोगिनीव्रतमाचर २९ अस्याःव्रतस्यपुण्येनकुष्ठंपास्यतितेध्रुवं इतिश्रुत्वामुनेर्वाक्यंदण्डवत्पतितोऽग्र
मा० तो ३० उत्थापितःस्वमुनिनावभूवातीवहर्षितः मार्कंडेयोपदेशेनकृतंतेनव्रतोत्तमम् ३१ तत्क्षणान्मुक्तकु
६६ ष्ठोसौदिव्यदेहोवभूवह ईदृग्विधंनृपश्रेष्ठकथितंयोगिनीव्रतं ३२ अष्टाशीतिसहस्राणिद्विजान्भोजयतेनरः
तत्फलंसमवाप्नोतियोगिनीव्रतकृन्नृप ३३ महापापप्रशमनीमहापुण्यफलप्रदा श्रुत्वोक्तस्यैकादशीनेका
थितायान्नृपोत्तम ३४ पठनाच्छ्रवणान्मर्त्यःसर्वपापैःप्रमुच्यते इतिश्रीब्रह्मवैवर्तपुराणेआषाढकृष्णैकादशी
माहात्म्यंसम्पूर्णम् युधिष्ठिरउवाच आषाढस्यसितेपक्षेकापिएकादशीभवेत् किंनामकोविधिस्तस्याःकिंफ
लंचवदस्वमे १ श्रीकृष्णउवाच कथयामिमहापुण्यांस्वर्गमोक्षप्रदायिनीं सत्यंसत्यंमयाप्रोक्तंतातःपरतरंनृणां
२ पापिनःपापनाशायहलगामणिउत्तमा येलैवैर्विलुभक्तैश्चसङ्गकैःस्तुतिपोषकैः ३ आषंढ वामनोपिलुब्ध
र्चितःतैर्जगत्त्रयं वामनःपूजितोयेनकमलैःकमलेक्षणः ४ आषाढस्यसितेपक्षेकामिकायादिनेतथा तेनार्चि
तंजगत्सर्वंत्रयोदेवाःसनातनाः ५ एतस्मात्कारणाद्राजन्कर्त्तव्यंहरिवासरं युधिष्ठिरउवाच संशयोस्तिमहान्म

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ स्नेन श्रूयतां वजनार्द्दन ६ कथं स सुप्तोस्ति देवेशः कथं तं बलिमाश्रयत् कथं तु पृथिवी दत्ता किं कुर्वंति जनास्तथा ७ किं
मा॰ व्रतं कोनिधिः श्रीव चातुर्मास्यमुपासते तस्मिन्सुप्ते जगन्नाथे किं कुर्वंति जनाः परे ८ एतद्विस्तरतो देवशंसयोत्तिमम्
६५ प्रभो वदस्व कृपया नाथ यतोहं तव वल्लभः ९ श्रीकृष्ण उवाच श्रूयतां राजशार्दूल कथां पापहरां परां बलिर्वै
दानवः पूर्वमासीत्त्रेतायुगे तथा १० पूजयंश्चैव मां नित्यं मद्भक्तो मत्परायणः यज्ञैस्तु विविधैः सूक्तैर्यजंते मां स नित्य
शः ११ पूजयत्स द्विजान्नित्यं यज्ञांश्चक्रे ह्यनेकशस्तथा परं तु इंद्रद्वेषी सोऽजैव लोकमजीजयत् १२ मद्दत्तमिंद्रलोकं वै जितं
तेन दुरात्मना एवं विचार्य वसुधां तत इंद्रेण सह किंभिः १३ मरुद्गणैर्देवतैः सार्धं वसुधा पूजितो ह्यहम् ततो वाम
न रूपेणाऽवतारेण पंचमः १४ अत्युग्ररूपेण तदा सर्वं ब्रह्मांडरूपिणा बालकेन जितः सोविसत्यमालंब्य तस्थि
वान् १५ मया व्याप्तं च तत्सर्वं सशुक्रं मतिसागरं एवं रूपं च मे दृष्ट्वा श्रूयतां राजसत्तम १६ संकल्पमात्रं वटुधेसाद्वित्रय
पदक्रमात् प्रार्थमानेन मया तदा संकल्पः पतितो धरां १७ भूर्लोके तु पदं न्यस्य भुवर्लोके तु जानुनी स्वर्लोके तु कटिं
न्यस्य महर्लोके तथोदरम् १८ जनलोके च हृदयं तपोलोके च कंठकम् सत्यलोके मुखं स्थाप्य उत्तमांगं तथो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ए. ईकं १९ चन्द्रसूर्यग्रहाश्चैव नक्षत्राणि यथा समवाः देवाः सेन्द्राश्च नागाश्च तथैवोदरगताः परे २० स्तुवंतो देवसंभू-
मा. तैः स्तोत्रैश्च विविधैस्तथा कोटिहोत्या च वलिं त्रिपदैः पूरितामहो २१ अर्द्धं तु तस्य पृष्ठेश्चैव पदं न्यस्य महात्मना स्थि-
६६ तो रसातले राजन् दानवो मम पूजकः २२ स्थितं तु दानवेनैव किं मया कर्तव्यं ततः परं विनयावनतश्चासौ सोऽसुरश्च प्रसन्नो ज-
नार्दनः २३ आषाढशुक्लपक्षे तु कामिका हरिवासरे तस्यामेकातु मूर्तिर्वै बलिमाश्रित्य तिष्ठति २४ द्वितीया
शेषपृष्ठे वै क्षीराब्धौ सागरोत्तमे सुप्यति च हृषीकेशो यावदायाति कार्तिकी २५ तावत्त्वं भवेत् पुण्यं सर्वपुण्योत्तमो-
त्तमम् एतस्मात्कारणाद्राजन् कर्तव्यं वै प्रयत्नतः २६ नातः परतरा काचित् पवित्रा पापनाशिनी यस्यां च सुप्यते दे-
वः शंखचक्रगदाधरः २७ तस्यां च पूजयेद्देवं त्रैलोक्यस्य पितामहं रात्रौ जागरणं कृत्वा भक्तियुक्तो विशेषतः २८
एवं यः कुरुते राजन्नेकादश्याः कथानकम् सर्वपापहरं चैव भुक्तिमुक्तिप्रदायकम् २९ श्रृणुयाच्चैव यो मर्त्यः कथां
पापहरां शुभाम् अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ३० इति श्रीस्कंदपुराणे देवशयनी आषाढशुक्लैकाद-
शी माहात्म्यं संपूर्णम् युधिष्ठिर उवाच आषाढस्य शुक्लपक्षे तु यद्देवशयनी व्रतम् तन्मया हि श्रुतं सर्वं पापौघवर्ज्जविस्तरं

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ १ श्रावणेकृष्णपक्षेतुकिंनामैकादशीभवेत् कोदेवःकोविधिस्तस्याःकिंपुण्यंकथयप्रभो: २ श्रीकृष्णउवाच
मा॰ इदमेवपुराप्रष्टोनारदेनमहात्मना ब्रह्मालोकगुरुर्देवःप्रत्युवाचप्रसन्नधीः ३ ब्रह्मोवाच शृणुनारदवक्ष्येलोका
६७ नांहितकाम्यया: श्रावणेकादशीकृष्णाकामिकानामनामतः ४ अस्याःश्रवणमात्रेणसर्वपापैःप्रमुच्यते अस्यां
यःपूजयेद्देवंशंखचक्रगदाधरं ५ श्रीधराख्यंहरिंविष्णुंमाधवंमधुसूदनं यजतेध्यायतेयोवैतस्यपुण्यफलंशृणु ६
गंगायांचैवकाश्यांचनैमिषेचपुष्करे तत्फलंसमवाप्नोतियत्फलंकृष्णपूजनात् ७ ससागरवनोपेतांयोददातिव
सुंधरां कामिकाव्रतकारीचउभौसमफलस्मृतौ ८ प्रसूयमानांयोधेनुंदद्यात्सोपस्करांनरः तत्फलंसमवाप्नोतिय
त्फलंकृष्णपूजनात् ९ लभतेदशगुणंपुण्यंकामिकाव्रतकारिकः श्रावणेश्रीधरंदेवंपूजयेद्योनरोत्तमः १० तेने
वपूजितादेवाःगंधर्वोरगपन्नगाः तस्मात्सर्वप्रयत्नेनकामिकादिवसेहरिः ११ पूजनीयोयथाशक्त्याःमनुष्यैःपा
पभीरुभिः येसंसारार्णवेमग्नाःपापपंकसमाकुलाः १२ तेषामुद्धरणार्थायकामिकाव्रतमुत्तमं नातःपरतराकाः
चित्पवित्रापापनाशिनी १३ एवंनारदजानीहस्वयमाहपुराहरिः अध्यात्मविद्यानिरतैःयत्फलंप्राप्यतेनरैः १४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ ततोबहुतरंविद्धिकामिकाव्रतसेवनात् कामिकायांव्रतेचीर्णेकिंकल्पंयोगिनोगताः १५ तस्मात्सर्वप्रयत्नेनकर्त
मा॰ व्यानियतात्मभिः तुलसीप्रसवैःपत्रैर्योनरःपूजयेद्धरिं १६ नसंलिप्यतिपापेनपद्मपत्रमिवांभसा सुवर्णभारमे
६८ कंतुरजतंचचतुर्गुणं १७ तत्फलंसमवाप्नोतितुलसीदलपूजनात् रत्नमौक्तिकवैडूर्यप्रवालादिरर्चितः १८ न
तुष्यतितथाविष्णुस्तुलसीदलपूजनात् तुलसीमंजरीभिश्चपूजितोयेनकेशवः १९ आजन्मकृतपापस्यतेनसंमा
र्जितालिपिः यादृष्टानिखिलाघसंघशमनीस्पृष्टावपुः २० रोगाणामभिवंदिताप्रशमनीसिक्तांतकत्रासिनी
प्रत्यासत्तिविधायिनीभगवतःकृष्णस्यसंरोपिता न्यस्तातच्चरणेविमुक्तिफलदातस्यैतुलस्यैनमः २१ दीपंददाति
योमर्त्योदिवारात्रौहरेर्दिने तस्यपुण्यस्यसंख्यानेचित्रगुप्तोऽभवत्पलं २२ कृष्णाग्रेदीपकोयस्तुज्वलत्येकादशीदि
ने पितरस्तस्यतुष्यंतिअमृतेनदिविस्थिताः २३ घृतेनदीपंप्रज्वाल्यतिलतैलेनवापुनः प्रयातिसूर्यलोकंसः
दीपकोटिशतैर्वृतः २४ अयंतवाग्रेकथिताकामिकामहिमामया अतोनरैःप्रकर्तव्यासर्वपातकहारिणी २५
ब्रह्महत्यापहारीचभ्रूणहत्याविनाशिनी त्रिदिवस्थानदात्रीचमहत्पुण्यफलप्रदा २६ श्रुत्वामाहात्म्यमेतस्याः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

ए॰ नरः श्रद्धासमन्वितः विष्णुलोकमवाप्नोति सर्वपापैः प्रमुच्यते २७ इति श्रीब्रह्मवैवर्त्तपुराणे श्रावणकृष्णैकाद
मा॰ शीकामिकामाहात्म्यं समाप्तम् युधिष्ठिर उवाच श्रावणस्य सितपक्षे किंनामैकादशी भवेत् कथयस्व प्रसादेन ममा
६५ ग्रे मधुसूदन १ श्रीकृष्ण उवाच शृणुष्वावहितो राजन् कथां पापहरां परां यस्याः श्रवणमात्रेण वाजपेयफलं लभेत्
२ द्वापरस्य युगस्यादौ पुरा माहिष्मती पुरी राजा महीजिताख्यातो राज्यं पालयति स्वकं पुत्रहीनस्य तस्यैव न तद्राज्यं सु
खप्रदं अपुत्रस्य सुखं नास्ति इह लोके परे तथा ४ पततोस्य नरव्याघ्र कालो बहुतरो गतः न प्राप्तश्च सुतो राज्ञा सर्वसौ
ख्यप्रदो नृणां ५ दृष्ट्वात्मानं प्रवयसं राजा चिंतापरोभवत् सद्यो गतः सभामध्ये इदं वचनमब्रवीत् ६ इह जन्मनि भो
लोका न मया पातकं कृतं अन्यायोपार्जितं द्रव्यं क्षिप्तं कोशे मया न हि ७ ब्रह्मस्वं देवद्रविणं गृहीतं मया कुचित् न्या
सापहारो न कृतः परस्य बहुपापतः ८ सुतवत्पालिता लोका धर्मेण विजिता मही दुष्टेषु पातितं दंडं बंधुपुत्रोपमेष्व
पि ९ शिष्टाः सुपूजिता लोके द्वेष्या अपि मया जनाः इत्येवं व्रजतो मार्गे धर्मयुक्ते द्विजोत्तमाः १० कस्मान्मम गृहे पुत्रो
न जातस्तद्विमृश्यतां इति वाक्यं द्विजाः श्रुत्वा सप्रजाः सपुरोहिताः ११ चिंतयित्वा ह्यपहितं जग्मुस्ते गहनं वनं २

ए॰ तस्मिंस्तस्य यशश्चक्रुराश्रमान्‌ऋषिसेवितान्‌ १२ दृष्टो हितैर्गुणैस्तैस्तु ददृशुर्मुनिसत्तमम्‌ तप्यमानंतपोघोरंनिरानंदं
मा॰ निरामयं १३ जितात्मानंजितक्रोधंसनातनं लोमशंधर्मतत्त्वज्ञंसर्वशास्त्रविशारदं १४ दीर्घायुषंमहा
७० त्मानंअनेकब्रह्मसंहितम्‌ कल्पेकल्पेगतेतस्यएकंलोमविशीर्यते १५ अतोलोमशनामानंत्रिकालज्ञंमहामुनिं
तंदृष्ट्वाहर्षिताःसर्वेआजग्मुस्तस्यसंनिधिं १६ यथान्यायंयथार्हंतेनमस्कर्तुंयथोचितं विनयावनताःसर्वेपप्रच्छुस्ते
परस्परं १७ अस्मद्भाग्यवशादेवप्राप्तोयंमुनिसत्तमः लोमशउवाच किमर्थमिहसंप्राप्ताःकथयध्वंस्वकारणम्‌
१८ प्रजाऊचुः संशयच्छेदनार्थायतवसन्निधिमागताः पद्मयोनेःपरस्त्वंहित्वत्तःश्रेष्ठोनविद्यते १९ अतःकार्यव
शात्प्राप्ताःसमीपंभवतोवयं महीजिन्नामराजासौपुत्रहीनोस्तिसांप्रतम्‌ २० वयंतस्यप्रजाब्रह्मन्पुत्रवत्परिपा
लिताः तंपुत्ररहितंदृष्ट्वातस्यदुःखेनदुःखिताः २१ तपःकर्तुमिहायातामतिंकृत्वातुनैष्ठिकीं तस्यभाग्यवशा
द्दृष्टस्त्वमस्माभिर्द्विजोत्तम २२ महतांदर्शनेनैवकार्यसिद्धिर्भवेन्नृणाम्‌ प्रत्युवाचमुनिर्ज्ञात्वातस्यजन्मपुरातन
म्‌ २३ लोमशउवाच पुराजन्मनिवैश्योयंधनहीनोनृशंसकृत्‌ वाणिज्यकर्मनिरतोग्रामाद्ग्रामांतरंभ्रमन्‌ २४

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ ज्येष्ठेमासिसितेपक्षेदशमीदिवसेतथा मध्यगेद्युमणौप्राप्तेग्रामासीम्निजलाशयं २५ कूपिकांसजलांदृष्ट्वाजल
मा॰ पानेमनोदधौ सद्यःप्रसूताधेनुर्वैसवत्सातत्रचागता २६ तृषातुरानिदाघार्त्तातस्यामापःपयोचसा पिवंतीकारि
७१ त्वातामसौतोयंपयोल्वयं २७ कर्मणातेनपापेनपुत्रहीनोनृपोभवत् कस्यापिजन्मनःपुण्यात्प्राप्तंराज्यमकंट
कं २८ पुण्यात्पापक्षयंयांतिपुराणेषुश्रुतंद्विजाः पुण्यंकरोतुभूपोसौतेनपुत्रोभविष्यति २९ प्रजाऊचुः पुण्यात्व
।पक्षयंयातिमुनामेतद्वदस्वत्व तत्पुण्यंनःसमाचक्ष्वयेनपापक्षयोभवेत् ३० यथाभवत्प्रसादेनपुत्रोभवतिभूपतेः
लोमशउवाच श्रावणेशुक्लपक्षेतुपुत्रदानामविश्रुता ३१ एकादशीवांछितदाकुरुध्वंतद्व्रतंजनाः यथाविधिं
यथान्यासंयथोक्तंजागरान्वितं ३२ तस्यपुण्यंसुविपुलंभूपालायप्रदीयतां एवंकृतेमुनियतेराज्ञःपुत्रोभविष्यति
३३ श्रुत्वांतेलोमशवचस्तंप्रणम्यद्विजोत्तमं जग्मुःस्वस्वगृहान्सर्वेप्रहर्षोत्फुल्ललोचनाः ३४ श्रावणेतुसमा
याद्यस्मृत्वालोमशभाषितं राज्ञासहव्रतंचक्रुःसर्वेश्रद्धासमन्विताः ३५ द्वादशीदिवसेपुण्यंददुस्तेपतयेजनाः
दत्तेपुण्येथराज्ञीचगर्भमाधत्तशोभनं ३६ प्राप्तेप्रसवकालेसासुषुवेपुत्रमूर्जितं एवमेषान्नृपश्रेष्ठपुत्रदानामवि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए॰ श्रुता ३७ वर्त्तेव्यासुत्वेमिथ्याक्षीरिहलोकेपरत्रच श्रुत्वामाहात्म्यमेतस्याःनरःपापैःप्रमुच्यते ३८ इहपुत्रसुखंल
